ISSN- 2583-5629

# दीपशिखा

रामकृष्णमिशन्-विवेकानन्द-शैक्षणिक-शोध-संस्थानस्य
संस्कृत-दर्शन-विभागस्य ई-पत्रिका

सप्तमः अङ्कः
(जुलाई, २०२४)



ISSN– 2583-5629

# दीपशिखा

(रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य
संस्कृतदर्शनविभागस्य षाण्मासिकी ई-पत्रिका)

सप्तमः अङ्कः
(जुलाई, २०२४)

उपदेष्टा

स्वामी आत्मप्रियानन्दः

मुख्यसम्पादकः

डॉ. राकेशदाशः

संस्कृतदर्शनविभागः
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानम्
बेलुडमठः, हावडा, पश्चिमवङ्गः ७११२०२

### प्रबन्धनसम्पादकः

स्वामी जपसिद्धानन्दः

### सम्पादकमण्डली

डॉ. गोपीकृष्णन् रघुः

डॉ. नीरजकुमारभार्गवः

डॉ. शन्तनुः अयाचितः

डॉ. सुखदेवभट्टः

प्रो. (डॉ.) उन्नीकृष्णन् नम्बूतिरिः

### सम्पादनसहायकः

शान्तनुनायेकः

शुभदीपदासः

# सूची


| क्रमः | प्रबन्धः<br>(पठितुं शीर्षकं नुदतु) | लेखकः | पुटसङ्ख्या |
|---|---|---|---|
| १. | सम्पादकीयम् | सम्पादकः | १ |
| २. | विवेकानन्दप्रेषितं पत्रम् | स्वामी विवेकानन्दः | ३ |
| ३. | श्रीरामकृष्णविवेकानन्दीयं वेदान्तविद्यागर्भं साधनफलसूत्रम् | स्वामी वेदार्थानन्दः | ४ |
| ४. | मेरुतुङ्गकथितः कालिदासवृत्तान्तः | डॉ. राकेशदाशः | ७ |
| ५. | भगवद्गीतोक्तसांख्ययोगबुद्धिद्वयदृष्ट्या स्वामिविवेकानन्दीयकर्मयोगविचारः | शुभदीप-दासः | १० |
| ६. | न्यायमीमांसादर्शनदिशा वेदस्य पौरुषेयत्वापौरुषेयत्वविचारः | प्रभातकुमारमण्डलः | १४ |
| ७. | निरुक्तशास्त्रस्य सामान्यपरिचयः | अनिरुद्धः वन्द्योपाध्यायः | १९ |
| ८. | पाणिनिपरिचयः | विश्वरूपबेजः | २२ |
| ९. | भारतस्य भवितव्यम्<br>(स्वामिविवेकानन्देन प्रदत्तस्य भाषणस्य अंशविशेषस्य अनुवादः) | स्वामी जपसिद्धानन्दः | ३२ |
| १०. | स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः<br>(अंशविशेषस्य अनुवादः) | डॉ. राकेशदाशः, शान्तनुनायेकः<br>(अनुवादकौ) | ३४ |
| ११. | स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्<br>(अंशविशेषस्य अनुवादः) | ब्रह्मचारी मनोमयः<br>(अनुवादकः) | ३७ |
| १२. | ब्रह्मानन्दस्वामिना सङ्कलितः श्रीश्रीरामकृष्णोपदेशः<br>(अंशविशेषस्य अनुवादः) | ब्रह्मचारी शुभदीपः<br>(अनुवादकः) | ४० |

# सञ्चारिणी दीपशिखा

सञ्चरति दीपशिखा । सप्तमः अङ्कः पूज्यानाम् अभेदानन्दस्वामिचरणानां जन्मदिवसे प्राकट्यम् आगतः इति महतः सन्तोषस्य विषयः। अस्मिन् अङ्के एकादशलेखाः सन्ति ।

श्रीशरच्चन्द्र-चक्रवर्तिनम् उद्दिश्य विवेकानन्दस्वामिना संस्कृतभाषया प्रेषितं पत्रम् एकादशसु प्राथम्येन शोभते।

वेलुडमठस्थित-रामकृष्णमठस्य ब्रह्मचारिप्रशिक्षणकेन्द्रस्य आचार्येण वेदार्थानन्दस्वामिना श्रीरामकृष्णविवेकानन्दीयं वेदान्तविद्यागर्भं साधनफलसूत्रम् इति विषयं स्वीयसाधुविचारैः प्रतिपाद्य कार्तज्ञ्यभाग् भवति। जीवसेवारूपेण धर्मेण मोक्षावाप्तिः एव विवेकानन्दस्वामिचरणानाम् उपदेशस्य रहस्यम् इति शास्त्रप्रवर्तनोचितया गम्भीरया प्रौढया च भाषया प्रकटितम् अस्ति अस्मिन् लेखे।

मेरुतुङ्गकथितः कालिदासवृत्तान्तः इति कश्चन विचारः प्रस्तुतः पत्रिकायाः मुख्यसम्पादकेन मया एव। वृत्तान्तः अतीव रुचिकरः मोदावहः च। मेरुतुङ्गेन कथिता इयं कथा बहूनाम् अज्ञातचरी इति कारणेन अयं लेखः सामान्यानाम् अपि संस्कृतप्रेमिणाम् आह्लादं जनयिष्यति इति सम्भावयामः।

अस्मद्विभागस्य शोधच्छात्रः शुभदीपदासः भगवद्गीतोक्तसाङ्ख्ययोगबुद्धिद्वयदृष्ट्या स्वामिविवेकानन्दीयकर्मयोगविचारं सुष्ठु विचार्य स्नेहभाग् भवति अस्माकम्। कर्मयोगस्य साङ्ख्यबुद्ध्या किं स्वारस्यं, योगदृष्ट्या च किं स्वारस्यम् इति विचार्यते अस्मिन् बन्धे। प्रकृतप्रसङ्गे साङ्ख्यशब्दस्य ज्ञाननिष्ठा, योगशब्दस्य च कर्मनिष्ठा इति अर्थः अङ्गीकरणीयः इति सुधियः विजानन्तु।

न्यायमीमांसादर्शनदिशा वेदस्य पौरुषेयत्वापौरुषेयत्वविचारं प्रस्तुतवान् प्रभातकुमारमण्डलः। अस्मद्विभागस्य एव समन्वित-एम्.ए-कक्षायां पञ्चमवर्षे अद्वैतवेदान्तोपविभागे अधीयानः अनिरुद्ध-वन्द्योपाध्यायः निरुक्तशास्त्रस्य सामान्यपरिचयं सम्यक् उपास्थापयत्। एवम् एव पाणिनेः मुनेः परिचयं विस्तारेण उपास्थापयत् अस्मद्विभागस्य समन्वित-एम्.ए-कक्षायाः भूतपूर्वच्छात्रः विश्वरूपवेजः नः श्लाघार्हः। इमे सर्वे अस्माकं कार्तज्ञ्यभाजः भवन्ति।

नवयुगाचार्याणां श्रीमद्विवेकानन्दस्वामिनां 'The Future India' इति भाषणं 'भारतस्य भवितव्यम्' इति शीर्षकाङ्कितं संस्कृते अनूद्य अस्मद्विभागस्य अध्यक्षचराः जपसिद्धानन्दस्वामिनः कार्तज्ञ्यसूत्रेण अस्मान् बध्नन्ति।

पूर्वाङ्केषु इव, श्रीरामकृष्णलीलाप्रसङ्गस्य अनुवादाय धन्यतावचनैः भूष्यते शान्तनुनायेकः।

अपि च, पूज्यैः गम्भीरानन्दस्वामिभिः विरचितस्य ब्रह्मानन्दस्वामिपादानां जीवनवृत्तस्य तथा च वन्दनीयचरणारविन्दैः ब्रह्मानन्दस्वामिपादैः सङ्कलितानां श्रीश्रीरामकृष्णोपदेशानाम् अनुवादं कृतवद्भ्यां ब्रह्मचारिभ्यां मनोमय-शुभदीपाभ्यां कृतज्ञता व्यज्यते ।

पत्रिकायाः अग्रिमः अङ्कः २०२५ तमस्य खृष्टाब्दस्य जनवरीमासे प्राकाश्यम् एष्यति।


*dīpaśikhā*/v7/2024/editorial/pp.1-2

सः अङ्कः कश्चन विशिष्टः अङ्कः भविष्यति। बेलुडमठपरिसरे विवेकानन्दस्वामिनां, ब्रह्मानन्दस्वामिनां च स्मृतिमन्दिरयोः शतवर्षपूर्तिम् उपलक्ष्य रामकृष्णसङ्घस्य विविधकेन्द्रेषु विविधानि अनुष्ठानानि आयोज्यन्ते। इमं सन्दर्भम् उपलक्ष्य वयम् अपि दीपशिखापत्रिकायाः विशेषाङ्कं प्रकाश्य श्रद्धासुमाञ्जलिं महापुरुषयोः चरणयोः निवेदयामः इति सङ्कल्पितम् अस्माभिः। अस्मै विशेषाङ्काय भवन्तः सर्वे अपि स्वीयान् लेखान् प्रेष्य अस्मान् अनुगृह्णन्तु इति सम्प्रार्थयामहे। लेखप्रेषणाय वैद्युतिनसङ्केतः dipasikha@gm.rkmvu.ac.in इति भवति।

प्रसङ्गेऽस्मिन् विश्वविद्यालयस्य प्रतिकुलाधिपतीनां श्रीमताम् आत्मप्रियानन्दस्वामिचरणान् प्रणमामः। पत्रिकायाः सम्पादने यथायथं साहाय्यम् आचरितवतः सर्वान् सकार्तज्ञ्यं स्मृत्वा विरमामो विस्तरात्।

डॉ. राकेशदाशः
दीपशिखापत्रिकायाः मुख्यसम्पादकः
तथा
विभागाध्यक्षः
संस्कृतदर्शनविभागस्य
रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थाने
बेलुडमठस्थिते

# विवेकानन्दप्रेषितं पत्रम्

## स्वामी विवेकानन्दः

[श्रीशरच्चन्द्रचक्रवर्तिनं सम्बोध्य संस्कृतेन प्रणीय १८९७-तमवर्षस्य मार्च्-मासस्य ऊनविंशदिनाङ्के आल्मोडातः श्रीमत्स्वामिविवेकानन्दपादैः प्रेषितं पत्रम्]

ओं नमो भगवते रामकृष्णाय

शुभमस्तु। आशीर्वादप्रेमालिङ्गनपूर्वकम् इदं भवतु तव प्रीतये। पाञ्चभौतिकं मे पिञ्जरम् अधुना किञ्चित् सुस्थतरम्। अचलगुरोर्हिमानी-मण्डितशिखराणि पुनरुज्जीवयन्ति मृतप्रायान् अपि जनान् इति मन्ये। श्रमबाधापि कथञ्चित् दूरीभूतेत्यनुभवामि। यत् ते हृदयोद्वेगकरं मुमुक्षुत्वं लिपिभङ्ग्या व्यञ्जितं, तन्मया अनुभूतं पूर्वम्। तद् एव शाश्वते ब्रह्मणि मनः समाधातुं प्रसरति। 'नान्यः पन्था विद्यतेऽयनाय।' ज्वलतु सा भावना अधिकम् अधिकं यावन्नाधिगतानाम् एकान्तक्षयः कृताकृतानाम्। तद् अनु सहसैव ब्रह्मप्रकाशः सह समस्तविषयप्रध्वंसैः। आगामिनी सा जीवन्मुक्तिस्तव हिताय तवानुरागदार्ढ्येनैवानुमेया। याचे पुनस्तं लोकगुरुं महासमन्वयाचार्य-श्री १०८ रामकृष्णम् आविर्भवितुं तव हृदयोद्देशं येन वै कृतकृतार्थस्त्वम् आविष्कृतमहाशौर्यः लोकान् समुद्धर्तुं महामोहसागरात् सम्यग् यतिष्यसे। भव चिराधिष्ठित ओजसि। वीराणाम् एव करतलगता मुक्तिर्न कापुरुषाणाम्। हे वीराः, बद्धपरिकराः भवत; सम्मुखे शत्रवः महामोहरूपाः। 'श्रेयांसि बहुविघ्नानि' इति निश्चितेऽपि समधिकतरं कुरुत यत्नम्। पश्यत इमान् लोकान् मोहग्राहग्रस्तान्। शृणुत अहो तेषां हृदयभेदकरं कारुण्यपूर्णं शोकनादम्। अग्रगाः भवत, अग्रगाः हे वीराः, मोचयितुं पाशं बद्धानां, श्लथयितुं क्लेशभारं दीनानां, द्योतयितुं हृदयान्धकूपम् अज्ञानाम्। अभीरभीरिति घोषयति वेदान्तडिण्डिमः। भूयात् स भेदाय हृदयग्रन्थीनां सर्वेषां जगन्निवासिनामिति—

तवैकान्तशुभभावुकः
विवेकानन्दः

# श्रीरामकृष्णविवेकानन्दीयं वेदान्तविद्यागर्भं साधनफलसूत्रम्

स्वामी वेदार्थानन्दः*

## पूर्वपीठिका

श्रीमठस्यान्तेवासिभिः श्रीमद्भिः आत्मनाथ-शुभदीप-मनोमयब्रह्मचारिभिः कतिभ्यश्चिद् दिनेभ्यः पूर्वम् अस्मदीयसङ्घस्य परमोदात्तौ प्रैषाविव मान्यौ महाविधी समधिकृत्य कश्चिद् विचारः प्रस्तुतोऽभवत्। अद्वैतमेव परमम् अध्यात्मसिद्धान्तम् उररीकृत्य अधीतशास्त्रैरेतैः विषयेऽस्मिन् यद् बहुधा विचारितं तद् अस्मानपि अत्र स्वाभिप्रायप्रकाशनाय प्रावर्तयत्। "शिवज्ञानेन जीवसेवा" इति श्रीमद्गुरुमहाराजचरणानां नियोजनं प्रसिद्धमेव। "आत्मनो मोक्षार्थं जगद्धिताय च" इति श्रीमत्स्वामिपादानाञ्च विधानं सङ्घाय। अथैतयोः महामन्त्रयोः तात्पर्यं वयमत्र यथामति प्रस्तुमः।

## ॥शिवज्ञानेन जीवसेवा॥

इदं साधनसूत्रम्। परोक्षापरोक्षब्रह्मविद्यागर्भञ्च। शिवज्ञानं नाम वेदान्तशास्त्रसिद्धा जीवब्रह्माभेदविद्या। सा पुनः सद्योमुक्तिविधायिनी अपरोक्षानुभूतिः, तदुपायभूता परोक्षरूपा उपासना चेति द्विविधा प्रसिद्ध्यति। एवञ्च सूत्रेऽस्मिन् परममुक्तेः साक्षात्साधनभूतं यद् अपरोक्षशिवज्ञानं तस्य साधनं विधीयते। अपरोक्षब्रह्मविद्यामुद्दिश्य परोक्षब्रह्मविद्यासमुच्चिता जीवसेवा विधीयते इति यावत्।

तथाहि, शिवपदं लिङ्गत्रयेऽपि परमात्मबोधकं भवति, "प्रपञ्चोपशमः शिवोऽद्वैतः" (माण्डूक्योपनिषत् १२), "तस्मादद्वयता शिवा" (माण्डूक्योपनिषत् २.३३), "यदात्मकञ्च सर्वं यच्चाजममृतमभयं शिवमद्वितीयं तत्सत्यं स आत्मा तव" (छान्दोग्योपनिषद्भाष्यम् ६.१६.३), "अभयं नित्यं शिवमचलमिच्छन् पप्रच्छ" (केनोपनिषत्पदभाष्यम् १.१) इत्यादिप्रमाणेभ्यः। शिवस्य सर्वात्मभूतस्य साक्षात्करणमेव मुख्यार्थे शिवज्ञानम्। गौणार्थे तु शिव एवायमिति सर्वजीवविषये यत्नतोऽभ्यस्यमानः प्रत्यय उच्यते। यथा गीताभाष्ये स्थितप्रज्ञलक्षणस्थले भाष्यकारभगवत्पूज्यपादाः आहुः– "सर्वत्रैव ह्यध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनान्युपदिश्यन्ते यत्नसाध्यत्वात्। यानि यत्नसाध्यानि साधनानि लक्षणानि च भवन्ति..." इति। इतोऽवगम्यते– स्थितप्रज्ञस्य परमलक्षणभूता या प्रज्ञा ब्रह्मविद्याख्या अपरोक्षा मुमुक्षूणां साध्या च सैव यत्नतोऽभ्यस्यमाना तेषां साधनं भवतीति।

एवञ्च शिवज्ञानं साध्यकोटिप्रविष्टं साधनकोटिप्रविष्टञ्चेति द्विविधम्। आद्यम् अपरोक्षम्, अन्यच्च परोक्षम्। उभयविधमपीदं शास्त्राचार्योपदेशादेव उपलभ्यते। उपदेशश्रवणेन साक्षादेव अपरोक्षज्ञानोदये सति द्वितीयस्य परोक्षशिवज्ञानस्य नावकाशः, नाप्युपयोगः।

* आचार्यः, ब्रह्मचारिप्रशिक्षणकेन्द्रस्य, रामकृष्णमठस्य, बेलुडमठस्य।

तदनुदये तु अधिकारिणश्चित्तवैशद्यानुसारं तरतमभावेन दृढमूलं परोक्षज्ञानं जीवस्य शिवत्वम् उद्भावयद् उपजायते। अस्य अपरोक्षतया साक्षात्कारस्तु विचारध्यानभजनानि अन्यानि सहकारिसाधनानि चापेक्षते। इयमेव साधनसम्पत् जीवस्य शिवाभेदसाक्षात्काराय यत्नतोऽनुवर्तनीया दीर्घकालनैरन्तर्यसत्कारैरासेव्य पोषणीया च विधीयते "शिवज्ञानेन जीवसेवा" इति। कर्तव्या इति शेषः।

शिवज्ञानम् अननुसृत्य क्रियमाणा जीवसेवा वेदान्तशास्त्रानुसारिणी न भवति इत्येतदपि प्रकृतविधेः सिद्ध्यति। अद्वैतसिद्धान्ते श्रद्धानेन साधकेन शिवोऽयमिति बुद्धिमाश्रित्य क्रियमाणैव जीवसेवा परमपुरुषार्थप्रदा स्यात्। एवञ्च 'अस्मदर्थमेव अस्मत्सेव्यत्वेन दरिद्रानिमान् अस्माकमीशः ससर्ज' इति, 'अस्मत्सेवया परितुष्टा जीवा अस्मदभीष्टरूपम् ईशम् अनुसरन्तु' इति, 'नित्यनैमित्तिकप्रायश्चित्तोपासनाविधिषु अन्यतमस्य अङ्गरूपेण ईशप्रसादादिकं फलमुद्दिश्य जीवाः सेव्याः' इति चैवमाद्या नानाविधा आत्माद्वैतविरुद्धा दृष्टयोऽनेन निवर्त्यन्ते।

अत्र शिवबुद्धिः सर्वजीवेषु कार्या, न केवलं स्वस्मिन्। सर्वात्मभावो हि मोक्षो वेदान्तविद्यया साध्यते। अन्यथा पातञ्जलादिसम्मतनानात्मवादगर्तपातः स्याद् वेदान्तसिद्धान्तरत्नस्य। अतः सर्वात्मनामेव अद्वैतं सततं ध्येयं मुमुक्षोः। एवञ्च शास्त्रीयाम् आत्माद्वैतदृष्टिम् अवलम्ब्य लोकदृष्टिपरिकल्पितान् जीवान् यथाशक्ति यथाप्रैषम् उपाजेकुर्वाणः सेवेत मुमुक्षुरिति विधीयते। फलन्तु तस्या एव शास्त्रसिद्धाया अद्वैतदृष्टेः साक्षात्कार इति अग्रिमसूत्रेण गम्यते।

इयं शिवज्ञानसमुच्चिता जीवसेवा किमर्था इति चेदुच्यते–

## ॥आत्मनो मोक्षार्थं जगद्धिताय च॥

इदं फलसूत्रम्। परोक्षशिवज्ञानसहितजीवसेवाव्रतस्य खल्वेषा फलचिन्ता। तद्व्रतं तद्व्रतिन आत्मनो मोक्षार्थं स्यात्, जगतो हिताय च। आत्ममोक्षफलम् अपरोक्षशिवज्ञानोदयम् अपेक्ष्यैव सिद्ध्यति। जगद्धितन्तु तदुदयानुदयौ अनपेक्ष्य सम्भवति। अत एवापरोक्षविद्योदयात् प्रागुत्तरञ्च शक्यनिष्पाद्यं स्यात् जगद्धितम्। अविधेयोऽपि विद्वान् लोकसङ्ग्रहार्थं जगद्धितम् आचरतीति अनादिवेदान्तसम्प्रदायान्तर्गताः गुरुचरणाः स्मरन्ति। विदुषो यदयत्नसिद्धम् उदारचरितं तदेव विविदिषोरपि यत्नतोऽनुवर्तनीयम् इत्यतो विद्योत्पत्तेः पूर्वं जगद्धिताय प्रवृत्तिः निवृत्तिमार्गाविरुद्धा साधनायते। अस्य साधनस्य इतिकर्तव्यता 'शिवज्ञानेन जीवसेवा' इति पूर्वं सूत्रिता। यथोक्तेन परोक्षशिवज्ञानाभ्यासेन सहितया जीवसेवया अपरोक्षं शिवज्ञानं प्राप्तस्य साधकस्यात्मा सर्वबन्धेभ्यो मुच्यते। अपरोक्षब्रह्मविद्याप्रसूतं परमपुरुषार्थं लभते इत्यर्थः।

कोऽयम् आत्ममोक्षः। उच्यते– आत्मनो जीवत्वप्रतीतिहेतोः अविद्यायाः ब्रह्मविद्यया बाधः। विद्याविद्ययोः विषयभूतम् आत्मस्वरूपं ब्रह्मैव मोक्षशब्दवाच्यम् इत्यपि बोध्यम्, संसारध्वान्तविनाशो हरिरिति हरिमीडेस्तोत्रे स्मरणात्, अन्यैश्च अद्वैताचार्यैः अस्य सिद्धान्तस्य अनुमोदितत्वात्। मोक्षं प्राप्तो विद्वान् आत्मानम् औपनिषदं ब्रह्मेति विजानाति। परमात्मा यथा सर्वज्ञत्वादिभिः स्वाभिन्नशक्तिविशेषैः सृजति, पालयति, संहरति, अवतरति, अध्यापयति, नियमयति, नियोजयति, प्रवर्तयति, निवर्तयति, समुद्धरति, संस्थापयति, मोहयति,

मोचयति च तथैव विद्वानपि सर्वैश्वर्यशाली सम्पद्यते, ब्रह्मब्रह्मविदोरभेदात्, ‘ब्रह्म वेद ब्रह्मैव भवति’ (मुण्डकोपनिषत् ३.२.९) इति श्रुतेः। ‘जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च’ (ब्रह्मसूत्रम् ४.४.१७) इति सूत्रेण सगुणब्रह्मविद्यालभ्यस्यैव ऐश्वर्यस्य परिच्छेदः कृतः, न तु परब्रह्मविद्याभिव्यक्तस्य। परब्रह्मविद् जीवन्मुक्तो जगद्व्यापारवान् सत्यकामः सत्यसङ्कल्पः सर्वज्ञः सर्वशक्तः परमेश्वर एव, नान्यः। तस्य विद्योदयात् पूर्वतनं वेदान्तविहितसाधनानुष्ठानं जगत्कल्याणानुकूलबुद्धिपुरस्सरम्। तस्य विद्योदयात् पश्चाद्भाविनी सशरीरस्थितिरपि अयत्नतः सर्वलोकानुग्राहिका शिवदा।

इदं फलबोधकसूत्रमपि अविद्वांसं प्रत्येव धर्मं बोधयति, न तु विद्वांसं प्रति, विदुषोऽविधेयत्वात्। अविद्वानेव विद्याधिकारी निवृत्तिपथं प्रपन्नोऽत्र समुपदिश्यते तात्पर्यतः– सहेतुसंसारान्मुक्तः प्रत्यक्षपरमात्मेव जगन्माङ्गल्यविधाता यो ब्रह्मात्मविद् विराजते तस्य मुमुक्षुशरण्यस्य जगद्गुरोः उदात्तचरितम् अनुवर्तमानस्त्वं विविदिषुः पूर्वोक्तशिवज्ञानमभ्यस्यन् जीवसेवाव्रती सन् जगद्धितसाधकेन आत्मविज्ञानेन मुक्तो भव इति।

## उपाश्रितं स्वामिपादानां पत्रम्

अस्य साधनफलविषयकस्य विवरणस्य उपाश्रयभूतं सद् अस्मत्स्वामिपादानामेव शास्त्रमर्मोद्घाटकं वचो वरीवर्त्ति। तथाहि श्रीशरच्चन्द्रचक्रवर्त्तिनं सम्बोध्य संस्कृतेन प्रणीय १८९७-तमवर्षस्य जूलैमासस्य तृतीयदिने अल्मोडातः श्रीमत्स्वामिपादैः सन्दिष्टे पत्रे पठामः–

> “आत्मेति वैराग्यवतो जीवात्मा इति नापद्यते। परन्तु सर्वगः सर्वान्तर्यामी सर्वस्यात्मरूपेणावस्थितः सर्वेश्वर एव लक्ष्यीकृतः। स तु समष्टिरूपेण सर्वेषां प्रत्यक्षः। एवं सति जीवेश्वरयोः स्वरूपतः अभेदभावात् तयोः सेवाप्रेमरूपकर्मणोरभेदः। अयमेव विशेषः— जीवे जीवबुद्ध्या या सेवा समर्पिता सा दया, न प्रेम, यदात्मबुद्ध्या जीवः सेव्यते, तत् प्रेम। आत्मनो हि प्रेमास्पदत्वं श्रुतिस्मृतिप्रत्यक्षप्रसिद्धत्वात्। तद् युक्तमेव यदवादीत् भगवान् चैतन्यः– ‘प्रेम ईश्वरे, दया जीवे’ इति। द्वैतवादित्वात् तत्र भगवतः सिद्धान्तः जीवेश्वरयोर्भेदविज्ञापकः समीचीनः। अस्माकन्तु अद्वैतपराणां जीवबुद्धिर्बन्धनाय इति। तदस्माकं प्रेम एव शरणं, न दया। जीवे प्रयुक्तः दयाशब्दोऽपि साहसिकजल्पित इति मन्यामहे। वयं न दयामहे, अपि तु सेवामहे; नानुकम्पानुभूतिरस्माकम्, अपि तु प्रेमानुभवः स्वानुभवः सर्वस्मिन्।”

इति॥

# मेरुतुङ्गकथितः कालिदासवृत्तान्तः

डॉ. राकेशदाशः*

भारतस्य कवितल्लजेषु ललामभूतः कविः कालिदासः। तस्य काव्येषु रसस्फूर्तिः, दार्शनिकचेतना, भावनागाम्भीर्यं च देशकालनैरपेक्ष्येण सहृदयहृदयानि आवर्जयति। बह्वीः शताब्दीः व्याप्य तस्य कृतयः पाठकानां दर्शकानां च मनांसि मोहयन्ति।

कालिदासस्य जन्मकालविषये विद्वांसः विवदन्ते। एवं मन्यते यत्, गुप्तानां शासनकाले कालिदासः व्यराजत। खृष्टीयचतुर्थशताब्द्याम् उत पञ्चमशताब्द्यां भारतेतिहासस्य सुवर्णमययुगे कालिदासः स्वीयप्रतिभया लोकमनांसि अरञ्जयत् इति विचार्यते।

प्रख्यातः भारततत्त्ववेत्ता Albrecht Weber-महोदयः प्रतिपादयति यत्, द्वितीयचन्द्रगुप्तस्य सम्राजः शासनकाले खृष्टीयपञ्चमशताब्द्यां कालिदासः समराजत। अपरः पाश्चात्त्यविद्वान् A. B. Keith-महोदयः लिखति यत्, गुप्तवंशीयशासकाः कालिदासस्य पृष्ठपोषकाः अभूवन् इति। एतेन इदं सिध्यति यत् अयं कविः खृष्टीयपञ्चमशताब्द्यां वा चतुर्थशताब्द्यां वा कस्यचन गुप्तवंशीयशासकस्य राजसभायां विराजते स्म। एवं हि श्रूयते–

धन्वन्तरि-क्षपणका-मरसिंह-शङ्कु-
वेतालभट्ट-घटकर्पर-कालिदासाः।
ख्यातो वराहमिहिरो नृपतेः सभायां
रत्नानि वै वररुचिर्नव विक्रमस्य॥

अस्मिन् पद्ये उच्यते यत्, नृपतेः विक्रमस्य सभायां नव रत्नानि आसन्। ते च– धन्वन्तरिः, क्षपणकः, अमरसिंहः, शङ्कुः, वेतालभट्टः, घटकर्परः, कालिदासः, वराहमिहिरः च। खेदस्य अयं विषयः यत्, कालिदासस्य जीवनचरितं वर्णयितुम् उपयुक्तं वस्तु बहुधा नैव लभ्यते। टीकाकाराः अपि अस्मिन् विषये न किञ्चिद् लिखन्ति। कालिदासः स्वग्रन्थेषु आत्मनः नाम विहाय अन्यत् किम् अपि तथ्यं न उल्लिखति। केचन कथयन्ति यत्, अवन्तिनरेशस्य विक्रमादित्यस्य राजसभायाम् अयं महाकविः आसीत्। कालिदासस्य मेघदूतकाव्ये उज्जयिनीनगर्याः, महाकालस्य, शिप्रानद्याः च विस्तृतवर्णनं दृष्ट्वा इदम् ऊहितुं शक्यते इति विदुषां मतम्। केचन कथयन्ति यत्, कालिदासः काश्मीरे अथवा वङ्गदेशे जन्म प्राप्य अनन्तरम् उज्जयिनीं गतवान् इति। तस्य कृतिषु मङ्गलाचरणेषु शिवस्य स्तुतिः दृश्यते। तेन अयं शैवः आसीत् इति मन्यन्ते विद्वांसः। किन्तु तस्य काव्येषु ब्रह्म-विष्ण्वादिदेवानाम् अपि प्रशंसापरं वर्णनम् उपलभ्यते।

मेरुतुङ्गः स्वीये प्रबन्धचिन्तामणिनामके ग्रन्थे आरम्भे एव लिखति यत्, अवन्तिदेशे राज्ञः विक्रमादित्यस्य प्रियङ्गुमञ्जरी-नाम्नी काचित् कन्या आसीत्। तस्याः अध्यापनाय वररुचिः इति पण्डितवर्यः नियोजितः आसीत्। अतीव बुद्धिमती सा अल्पैः एव दिनैः सर्वाणि शास्त्राणि अधिगतवती। एकद्युः घर्मकाले मध्याह्नसमये आचार्यं मार्गे सञ्चरणेन श्रान्तं दृष्ट्वा

* विभागाध्यक्षः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

वातायनोपविष्टा प्रियङ्गुमञ्जरी तं परिजिहासन्ती कानिचन आम्रफलानि तस्मै दर्शयित्वा अपृच्छत्, "किं भवते इमानि फलानि उष्णानि रोचन्ते उत शीतलानि?" तदा आचार्यः अवदत्, "उष्णानि एव फलानि इष्टानि" इति। तदा आचार्येण विस्तृते वस्त्राञ्चले फलानि पातयन्ती ज्ञात्वा एव तिर्यक् पातितवती। तेन फलानि मृत्तिकायां पतितानि। तदा भूमेः फलानि उत्थाप्य आचार्यः मुखमारुतेन धूलिम् अपनयति स्म। तद् दृष्ट्वा राजकन्या तम् उद्दिश्य उपहासेन अवदत्, "किं फलानि तावद् उष्णानि यत् मुखमारुतेन शीतलीकरोति भवान्?" इदं श्रुत्वा कुपितः आचार्यः अभिशापं दत्तवान् यत्, राजकन्यायाः विवाहः केनचित् पशुपालकेन सह भविष्यति इति। इदं श्रुत्वा राजकन्या अपि अवदत् यत्, "विद्यया तव यः परमगुरुः तादृशम् एव अहं परिणेष्यामि इति।" अग्रे कदाचित् विक्रमादित्यस्य आग्रहेण एव वररुचिः राजकन्यायाः परिणयाय विदुषः वरस्य अन्वेषणे निरतः। कदाचित् अरण्यप्रान्ते भ्रमन् स पिपासितः एकं पशुपालकं दृष्ट्वा तं जलं याचितवान्। पशुपालस्य सकाशे जलं न आसीत्। स पण्डितम् अवोचत्, "करवडीं कुरु" इति। पण्डितः एतादृशम् अश्रुतचरं शब्दम् अज्ञात्वा स्थितः। तदा पशुपालकः पण्डितस्य शिरसि हस्तं दत्त्वा तं महिष्याः अधः उपवेश्य करतलद्वययोजनं कारयित्वा तां मुद्राम् एव "करवडी" इति अवदत्। ततः तम् उदरपूरं दुग्धं पायितवान्। इत्थं शिरसि हस्तस्थापनेन, नवशब्दशिक्षणेन पशुपालः तस्य गुरुसदृशः अभवत्। ततः तं पशुपालं षड्भिः मासैः "ॐ नमः शिवाय" इति मन्त्रं कण्ठस्थं कारितवान्। ततः कदाचित् शुभदिने तं सम्यक् शृङ्गारं कृत्वा राजसभां नीतवान्। राज्ञे आशीर्वादसमये अयं षड्भिः मासैः अभ्यस्तम् "ॐ नमः शिवाय" इति मन्त्रम् अपि विस्मृत्य "उशरट" इति अवोचत्। अनेन विचित्रशब्देन विस्मितं राजानं वररुचिः उक्तवान् यत्, अयं शब्दः कस्यचन श्लोकविशेषस्य संक्षिप्तं रूपम्। स श्लोकः इत्थम्–

उमया सहितो रुद्रः शङ्करः शूलपाणिभृत्।
रक्षतु त्वां महीपाल टङ्कारबलगर्वितः॥

एतेन तस्य अज्ञातचरस्य पाण्डित्यगाम्भीर्येण चकितः तेन महिषीपालेन सह एव पुत्र्याः परिणयं कारितवान्। सः अपि नवपरिणीतः सर्वथा मौनम् अवलम्ब्य तिष्ठति स्म। एकस्मिन् दिने राजपुत्री स्वपत्युः पाण्डित्यपरीक्षणाय नवरचितस्य कस्यचन पुस्तकस्य अक्षरशोधनाय प्रदत्तवान्। अयं तु नखच्छेदिन्या सर्वाणि अक्षराणि बिन्दुमात्रारहितानि अकरोत्। एतेन राजपुत्री अवगतवती यत्, अयं मूर्खः इति। ततः प्रभृति एतादृशमूर्खतायाः कृते "जामातृशुद्धिः" इति शब्दबन्धस्य प्रचलनम् अभवत्। ततः कदाचित् एकस्मिन् चित्रे महिषीणां समूहं दृष्ट्वा अयम् अतीव सन्तोषेण विकृतभाषया किञ्चिद् अवदत्। एतेन राजपुत्री निश्चितवती यत्, अयं कश्चन महिषीपालः इति। ततः राजपुत्र्याः आज्ञया सः वनं गत्वा पाण्डित्यसम्पादनाय देव्याः काल्याः उपासनायां निरतः। एतेन राजा भीतः। स चिन्तितवान् यत्, कदाचित् अयं म्रियते चेत् राजपुत्री विधवा भविष्यति। अतः राजा काञ्चन दासीं प्रेषितवान् महिषीपालस्य तपस्याभञ्जनाय। सा दासी देव्याः काल्याः वेशं धृत्वा तस्य सकाशं गत्वा "अहं तव सन्तुष्टा" इति अवदत्। तदा देवी कालिका अपि तस्य पुरतः प्रत्यक्षीभूय तम् अनुगृहीतवती। ततः तस्य महिषीपालस्य कालिदासः इति नाम अभवत्। सः तदा राजपुत्र्याः सकाशं गतवान्। राजपुत्री अपृच्छत्, "अस्ति कश्चिद् वाग्विशेषः?" (कोऽपि नवशब्दः त्वया शिक्षितः न वा इति राजपुत्र्याः अभिप्रायः आसीत्)। एवं

शब्दबन्धम् आदाय सः त्रीणि महाकाव्यानि तथा षट् प्रबन्धान् रचितवान्।

मेरुतुङ्गस्य कथनानुसारं कालिदासस्य नव ग्रन्थाः सन्ति इति ज्ञायते। किन्तु एतावता कालिदासस्य द्वे महाकाव्ये, द्वे खण्डकाव्ये, त्रीणि नाटकानि लभ्यन्ते। केचन कथयन्ति यत्, 'नलोदयं', 'शृङ्गारतिलकं', 'शृङ्गाराष्टकं', 'द्वात्रिंशत्पुत्तलिका', 'श्रुतबोधः' इति काव्यानि अपि कालिदासेन रचितानि इति मतं पण्डितानाम्। एतेषु श्रुतबोधः नाम काव्यं छन्दोलक्षणबोधकं काव्यम्। श्रव्यकाव्ये दृश्यकाव्ये च कालिदासस्य नैपुण्यम् आसीत् इत्यत्र सन्देहलेशः नास्ति। एतेषु नलोदयकाव्यं चतुःसर्गात्मकं यमककाव्यं भवति। श्रुतबोधः छन्दोलक्षणप्रतिपादकं काव्यम्। द्वात्रिंशत्पुत्तलिकाग्रन्थः वेतालपञ्चविंशतिः इव कथाग्रन्थः वर्तते।





दीपशिखा

# भगवद्गीतोक्तसांख्ययोगबुद्धिद्वयदृष्ट्या स्वामिविवेकानन्दीयकर्मयोगविचारः

शुभदीप-दासः*

## भूमिका

सनातनधर्मप्रचारकाणां सन्न्यासिनां स्वामिचरणानां न किमपि वचनं मतं वा शास्त्रम् अतिक्राम्यति इति अस्माकं सुदृढो विश्वासः। वाग्बाणप्रक्षेपणपटवः स्वामिचरणाः स्वभाषणमालायां बहुत्र कर्मयोगविषये आलोचनं विहितवन्तः। यदि अस्माभिः तानि भाषणानि अधीत्य विचार्यते तर्हि तैः आधुनिकप्रासङ्गिकदृष्टान्तद्वारा गीतोक्तः एव कर्मयोगः स्वभाषया प्रतिपादितः इति सुतराम् अवगम्यते। अतः ये तावद् मन्यन्ते यत् स्वामिविवेकानन्दीयकर्मयोगगीतोक्तकर्मयोगयोः अत्यन्तं विरोधः अस्ति इति ते भ्रान्ताः करुणास्थानानि इत्येव वक्तुं शक्यते। अस्य निबन्धस्य विषयः—भगवद्गीतोक्तसांख्ययोगबुद्धिद्वयदृष्ट्या स्वामिविवेकानन्दीयकर्मयोगविचारः इति। अतः आदौ भगवद्गीतायां प्रतिपादितं बुद्धिद्वयं प्रदर्श्य तद्दृष्ट्या स्वामिचरणानां कर्मयोगं विचारयामः।

## भगवद्गीतोक्तदिशा कर्मयोगविचारः

कुरुक्षेत्रसमराङ्गणे स्वजनदर्शनेन शोकाकुलम् अर्जुनं प्रबोधयितुं पार्थसारथेः भगवतः श्रीकृष्णस्य वचनामृतम् एव श्रीमद्भगवद्गीता इति नाम्ना सनातनधर्मस्य मध्यमणिः इव राजते। तत्र द्वितीयाध्याये तृतीयाध्याये च कर्मयोगविचारः कृतः।

## भगवद्गीतोक्तं बुद्धिद्वयम्

गीताग्रन्थे सांख्यबुद्धिः योगबुद्धिः इति बुद्धिद्वयं पृथक्तया निर्दिष्टम्। तत्र द्वितीयाध्यायभाष्ये भगवत्पादानां निर्वचनम्— “आत्मनो जन्मादिषड्विक्रियाभावादकर्तात्मा इति प्रकरणार्थनिरूपणात् या बुद्धिर्जायते सा सांख्यबुद्धिः। आत्मनो देहादिव्यतिरिक्तत्वकर्तृत्वभोक्तृत्वाद्यपेक्षो धर्माधर्मविवेकपूर्वको मोक्षसाधनानुष्ठानलक्षणो योगः। तद्विषया बुद्धिर्योगबुद्धिः” इति। तत्र सांख्यबुद्धिम् आश्रित्य ज्ञानयोगनिष्ठा योगबुद्धिम् आश्रित्य च कर्मयोगनिष्ठा सम्भवतः। तस्मादेव अर्जुनोपालम्भं निराकरोति श्रीभगवान्—

लोकेऽस्मिन्द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्॥

सामान्यतया इमे तमःप्रकाशवद् अत्यन्तविरुद्धे इति प्रतीयते। यतो हि अकर्तृत्वम् एकत्वं च आश्रित्य सांख्यबुद्धिः प्रवर्तते। कर्तृत्वमनेकत्वं चाश्रित्य योगबुद्धिः प्रवर्तते। अतः सांख्यबुद्ध्याश्रितानां न कदापि कर्मयोगनिष्ठा सम्भवति योगबुद्ध्याश्रितानां च न कदापि ज्ञानयोगनिष्ठा सम्भवति इत्येव अर्थः आगच्छति। इदम् एव आश्रित्य ज्ञानकर्मणोः समुच्चयवादः

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

खण्डितो भगवत्पादैः।

## बुद्धिद्वयस्य मोक्षोपयोगित्वम्

यद्यपि इदं बुद्धिद्वयं युगपद् अनुष्ठातुं न शक्यते इति तयोः अत्यन्तं विरोधः तथापि क्रमेण आचरणं तु शक्यते। तत्र आदौ योगबुद्ध्या अर्थात् कर्तृत्वबुद्धिफलाभिसन्धिरहिततया कर्म क्रियते। स च कर्मयोग इत्युच्यते। अयं च कर्मयोगः समाधौ पर्यवस्यति। अस्यां दशायाम् अन्तःकरणम् अशुद्धं भवति। अतः जायमानं ज्ञानमपि अशुद्धमेव भवति। तदनन्तरं चित्तशुद्धिः जायते। तदा अन्तःकरणस्य शुद्धता सम्पद्यते। तेन शुद्धान्तःकरणेन शुद्धं ज्ञानम् उत्पद्यते। ततः ज्ञाननिष्ठायोग्यता आगच्छति। तस्यां च सत्यां सर्वकर्मसन्न्यासेन ज्ञाननिष्ठा सम्भवति। इयमेव सांख्यनिष्ठा स्थितप्रज्ञा इत्याद्यैः शब्दैः व्यवह्रियते। तस्या एव ज्ञाननिष्ठाया मुक्तिः सम्भवति। तदेव परिनिष्ठितं ज्ञानम्। अतः कर्मणा चित्तशुद्धिरेव जायते। तस्माद् एव उक्तम्— "चित्तस्य शुद्धये कर्म न तु वस्तूपलब्धये।"

तत्र कर्मणा ज्ञानम् उत्पद्यते इति मतं सर्वथा न मिथ्या, ज्ञानं तु उत्पद्यते एव। परन्तु तत्र यद् ज्ञानम् उत्पद्यते तद् ज्ञानं न परमम्। परमज्ञानं साक्षाद् ज्ञाननिष्ठया एव जायते, कर्मणा तु परम्परया। स च क्रमः रेखाचित्रद्वारा प्रदर्श्यते—

समाध्यन्तकर्मयोगानुष्ठानम्—चित्तशुद्धिः—ज्ञानम्—ज्ञाननिष्ठायोग्यता—सर्वकर्मसन्न्यासः—ज्ञाननिष्ठा—मुक्तिः।
(अपरिष्कृतं ज्ञानम्) — (परिष्कृतं ज्ञानम्) — (परिनिष्ठितं ज्ञानम्)

तस्मात् कर्मयोगः ज्ञानयोगश्च न वैकल्पिकः उपाय। ज्ञाननिष्ठाया एव मोक्षो भवति। कर्मयोगस्तु ज्ञाननिष्ठायोग्यताप्राप्तिसोपानत्वेन स्वीकर्तुं शक्यते। अतः कर्मयोगेनैव मोक्षः इति मतं भगवद्गीतायां सर्वथा निराकृतम्।

## स्वामिचरणानां कर्मयोगः

स्वामिप्रदत्तेषु बहुषु भाषणेषु विक्षिप्ततया तत्र तत्र कर्मयोगविषयः समालोचितः। तत्र स्वामिचरणैः गीतायां प्रतिपादितं कर्मयोगस्य स्वरूपं साक्षाद् न कुत्रापि कथितम्। परन्तु तेषां भाषणेषु भगवद्गीतोक्तकर्मयोगविषयकाः सिद्धान्ता एव तत्र तत्र समुपलभ्यन्ते। सम्प्रति स्वामिचरणानां तादृशैः वचनैः गीतोक्तसिद्धान्तस्य सङ्गतिः प्रदर्श्यते।

**१. निःस्वार्थपरता—**

क) स्वामिपादैः उक्तम्— "अस्माकं लक्ष्यं मोक्षः। स च स्वार्थरहितेन एव लब्धुं शक्यते। स्वार्थहीनं कर्म स्वार्थविहीना चिन्ता स्वार्थरहितं वाक्यम् अस्मान् तत् लक्ष्यं प्रत्येव नयति। अतः अहन्त्वपरित्यागः एव कर्तव्यः। यः मूढः कथयति यत् अहन्त्वपरित्यागः एव न सम्भवति सः प्रष्टव्यः— यः स्वार्थशून्यः जनः स्वस्य कृते न चिन्तयति, स्वस्य कृते न करोति तस्य अहन्त्वं क्व गतमिति। तस्मात् स्वार्थबुद्धिराहित्येन सत्कर्मणा च मुक्तिलाभस्य उपायः एव कर्मयोगः। कर्मयोगिनां कस्मिंश्चित् धर्मे विश्वासः अनपेक्षितः। स ईश्वरं न विश्वसेत्, आत्मानं नानुसन्दध्यात्, दार्शनिकविचारं न कुर्यात् चेदपि न कश्चित् क्लेशः। स्वार्थशून्यता एव तस्य परमं लक्ष्यम्। ज्ञानी विचारेण भक्तश्च भक्त्या यत् लक्ष्यं साधयति तदेव लक्ष्यं कर्मणा कर्मयोगिना साधनीयम्" इति।

ख) किञ्च— “यः यशोधनाद्यभिसन्धिरहिततया कर्म कुरुते, स एव समीचीनं कर्म आचरति। यदा मनुष्यः एतादृशं कर्म कर्तुं शक्ष्यति तदा सोऽपि ज्ञानी भविष्यति। तस्यान्तःस्थलात् तथा कर्मशक्तिः प्रकाशिता भविष्यति या जगदेव परिवर्तयिष्यति। एतादृशः जनः एव कर्मयोगस्य चरम आदर्शः। कर्तृत्वबुद्धिफलाभिसन्धिरहिततया क्रियमाणं कर्म कर्मयोगः इति तु गीतायामपि प्रतिपादितम्। स्वामिचरणानामिदं तदेव मतमनुकरोति। समीचीनो भव, समीचीनं कर्म च कुरु। इदमेव युष्माकं मुक्तिप्रदं भविष्यति” इति।

ग) अपि च— “अस्माकं लक्ष्यं मुक्तिः, अस्माकं लक्ष्यं स्वार्थहीनता। कर्मयोगानुसारं कर्मणैव वयं तत् लक्ष्यं प्राप्तुं शक्नुमः। तस्मादेव अस्माभिः कर्मरहस्यं ज्ञातव्यम्। यदि कर्मयोगी जिज्ञासते यत् मुक्तये मुमुक्षुत्वादतिरिक्तं किमपेक्षते इति तदा फलाभिसन्ध्यतिक्रमणमेव उत्तरम्। कर्मण्येव तव अधिकारः, न तु कर्मफले। उक्तं च गीतायाम् - कर्मण्येवाधिकारस्ते मा फलेषु कदाचन इति। यदि फलाभिसन्ध्या कर्म क्रियते तदा फलं यावत् महत् वा भवतु बन्धनं भवत्येव। अतः स्वर्गाभिसन्ध्या क्रियमाणं यागादिकमपि बन्धनकारणम्। अतः सर्वकर्मफलपरित्यागः कर्मफलानासक्तिः एव मोक्षस्य केवल उपायः” इति।

भगवद्गीताभाष्ये कर्मयोगपदनिर्वचनं कृतम्— कर्मैव योगः कर्मयोगः। तत् च कर्म कर्तृत्वबुद्धिफलाभिसन्धिरहिततया क्रियमाणम्। स्वामिनश्च स्वार्थशून्यता एव अस्माकं लक्ष्यम् इति प्रतिपादयन्ति। स्वार्थशून्यत्वं नाम कर्तृत्वबुद्धिफलाभिसन्धिराहित्यमेव इति सुसङ्गतमिदम्। परन्तु अत्र काचिद् विप्रतिपत्तिरस्ति। तत्रोक्तम् - ज्ञानी विचारेण भक्तश्च भक्त्या यत् लक्ष्यं साधयति तदेव लक्ष्यं कर्मणा कर्मयोगिना साध्यते इति। अत्र लक्ष्यं नाम मुक्तिरेव। परन्तु मोक्षः न कदापि कर्मणा सम्भवति इति गीतायां निश्चितोऽर्थः। अत्र एवं वक्तुं शक्यते यद् लक्ष्यं नाम न मुक्तिरत्र। ज्ञानी न कदापि विचारेण मुक्तो भवति, न वा भक्तः भक्त्या। तत्र चित्तशुद्धिः ज्ञाननिष्ठायोग्यता वा लक्ष्यत्वेन स्वीकर्तुं शक्यते। तत् तु कर्मणापि भवति इति न कश्चिद् विरोधः।

**२. ज्ञानेनैव मोक्षः—**

स्वामिनाम् अपरं वचनम्— “न कर्मणा कदाचित् पूर्णत्वं लभ्यते” इति। अतः कर्मणा मोक्षो न कदापि सम्भवति इत्येव स्वामिनामपि मतम् आसीद् इति स्पष्टम् अवगम्यते। अनेन वाक्येन तदेव लक्ष्यं कर्मणा कर्मयोगिना साधनीयम् इत्यत्र या शङ्का समुत्थापिता तस्य समाधानं कर्तुं शक्यते।

पूर्वपक्षभूतैः मीमांसकैः ज्ञानकर्मणोः समुच्चयः प्रतिपाद्यते। तेषां मते कर्मसमुच्चिताद् ज्ञानादेव मोक्षः सम्भवति। परन्तु वेदान्तसिद्धान्ते तमःप्रकाशवद् अत्यन्तविरुद्धयोः ज्ञानकर्मणोः न कदापि समुच्चयः सम्भवति। ज्ञानमेव मोक्षस्य केवल उपायः। न हि अन्येन केनापि उपायेन मोक्षो भवितुमर्हति। उपायान्तरनिषेधश्च श्रुत्यैव कृतः— “तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय॥”

भगवद्गीतायां शङ्करभगवत्पादैश्च भगवद्गीताभाष्ये ज्ञानकर्मणोः समुच्चयः निराकृतः। अतः स्वामिचरणानां मतं श्रीमद्भगवद्गीतामेव अनुकरोति।

**३. स्वामिचरणैः उक्तम्—**

"न किञ्चित् कर्म सम्पूर्णतया पवित्रं सम्पूर्णतया अपवित्रं वा" इति। तत्र हिंसायुक्तं कर्म अपवित्रं हिंसारहितं कर्म पवित्रम् इति। इदं वाक्यं गीतोक्तसिद्धान्तमेव द्रढयति। तत्रादौ अस्माभिश्चिन्तनीयम् - हिंसा कदा भवति। यदि कस्यचित् कस्मिंश्चिद् विषये कामः अस्ति तदैव हिंसा उत्पद्यते। यतो हि इष्टवस्तुनः अप्राप्तौ एव हिंसा उत्पद्यते। अतः हिंसा काममूला इति प्राप्तम्। तथा च हिंसायुक्तं कर्म इत्युक्ते कामयुक्ततया क्रियमाणं कर्म। कामः नाम फलकामना। ज्योतिष्टोमयागः क्रियते चेत् स्वर्गः लभ्यते इति ज्ञात्वा स्वर्गरूपफललाभार्थमेव सर्वे ज्योतिष्टोमयागं कुर्वन्ति। फलाकाङ्क्षा तदैव भवति यदा अहम् अस्य यागस्य कर्ता इति कर्तृत्वबुद्धिस्तिष्ठेत्। यदि कर्म कर्तृत्वबुद्धिरहिततया क्रियते तदा फलकामनाभावात् हिंसा नैवोत्पद्यते। तस्मात् कर्तृत्वबुद्धिफलाभिसन्धिरहिततया क्रियमाणं कर्म पवित्रमिति स्वामिमतं प्राप्तम्। गीतायामपि कामनावासनादिरहिततया क्रियमाणं कर्म कर्मयोगः। तदेव कर्म चित्तशुद्धिं जनयति। तेनैव च कर्मणा परम्परया मोक्षो भवति इति प्रतिपादितम्। अतः स्वामिनां वचनेऽस्मिन् गीतासिद्धान्तः एव प्रकटितो भवति।

**उपसंहारः**

स्वामिनां मते तु अयं संसारः एकः चक्ररूपयन्त्रविशेषः। एकस्य कर्तव्यस्य समाप्तेः अनन्तरं कर्तव्यान्तरम् आगच्छत्येव। अतः अस्य जगच्चक्रस्य न कुत्रापि समाप्तिर्वर्तते। अस्माद् निरन्तरचक्राद् निष्क्रमणस्य उपायद्वयमेव वर्तते। प्रथमः सकलवासनापरित्यागः। तं च आश्चर्यवत् सहस्रेषु कश्चित् कर्तुं शक्नोति। द्वितीयः कर्मरहस्यावगतिः। अयमेव कर्मयोग इत्युच्यते। कर्मानुष्ठानेनैव अस्मात् चक्राद् निष्क्रमणं सम्भवति। परन्तु तद् न सामान्यं कर्म। अपि तु कर्तृत्वबुद्धिफलाभिसन्धिरहिततया क्रियमाणं कर्म। योगबुद्ध्या कर्माचरणं कर्मयोगः, तेन च चित्तशुद्धिः इति यः गीतासिद्धान्तः स एव सिद्धान्तः स्वामिभिरपि स्वीकृतः इति तेषां वचनादवगम्यते। इत्थं गीतादिशा स्वामिचरणानां कर्मयोगः विचारितः अस्माभिः।



*dīpaśikhā*/v7/2024/Subhadeep Das/pp. 10-13

# न्यायमीमांसादर्शनदिशा वेदस्य पौरुषेयत्वापौरुषेयत्वविचारः

प्रभातकुमारमण्डलः*

## उपक्रमः

वेदः किं पौरुषेयः आहोस्विद् अपौरुषेयः इति महान् विषयः। तत्र तत्र शास्त्रेषु विचारितश्च। प्रथमं तावद् वेदो नाम कः यस्मिन् पौरुषेयत्वापौरुषेयत्वविचारः प्रवर्तितः। प्रसिद्धः श्लोकः–

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता॥ इति।

एवञ्च प्रत्यक्षानुमाभ्याम् अनवगतोपायार्थबोधकः ग्रन्थः वेदः। भाष्यकाराः शंकराचार्याः अपि बृहदारण्यकभाष्ये— "सर्वोऽप्ययं वेदः प्रत्यक्षानुमानाभ्यामनवगतेष्टानिष्टप्राप्तिपरिहारोपायप्रकाशनपरः"[१] इत्याहुः। अयं च वेदः परमप्रमाणभूतः पूर्वोत्तरमीमांसयोः। प्रमाणान्तरापेक्षया अस्य प्राबल्यं च निरूपितं तत्र। स चायं वेदः किं स्वतः एव प्रमाणभूतः अथवा पुरुषविशेषकर्तृकत्वाद् इत्यत्रैव विवदन्ते विपश्चितः। तदत्र दार्शनिकश्रेष्ठान् वेदवाक्यमीमांसकान् मीमांसकान् सिद्धान्तीकृत्य तैः सह नैयायिकानां रुचिकरः वादः निरूप्यते।

## नैयायिकः

पौरुषेयास्तावत् वेदाः अनित्याः, ईश्वरोक्तत्वात् च प्रमाणभूताः इति तर्करसिकाः। तथाहि आप्तवाक्यं शब्दः। वाक्यं पदसमूहः। स च द्विविधः लौकिकः वैदिकश्च। आप्तस्तु यथार्थवक्ता इति। स च लोके अनिश्चितः। तथाहि लोके कश्चन यथार्थं जानीयाद् ज्ञात्वा वदेदपि। अन्यस्तु न जानीयात्। कश्चित्तु ज्ञात्वापि न वदेत्। कश्चन अन्यथा वा वदेत्। अतः लौकिकं वाक्यं सर्वं प्रमाणं न भवति। आप्तोक्तमेव प्रमाणं भवति। वैदिकं तु वाक्यम् ईश्वरोक्तत्वात् सर्वमेव प्रमाणम्। सर्वज्ञत्वाद् ईश्वरस्य लौकिकेषु पुरुषेषु ये दोषाः सम्भवन्ति भ्रमप्रमादादयः ते ईश्वरे न सन्ति। अतः तदीयं वाक्यं सर्वं प्रमाणम्। स च वेदः शब्दरूपत्वाद् अनित्यः पौरुषेयश्च। वेदवाक्यं पौरुषेयं वाक्यत्वाद् भारतादिवाक्यवत् इत्याद्यनुमानमपि पौरुषेयतामेव समर्थयति तस्य। अनित्यत्वं च क्षणिकत्वम्। (क्षणिकत्वं नाम तृतीयक्षणवृत्तिध्वंसप्रतियोगित्वम्।)

## मीमांसकः

अपौरुषेयाः हि वेदाः नित्याश्च इति मीमांसकाः। अपौरुषेयत्वे च श्रुतीनां – वेदः अपौरुषेयः सम्प्रदायाविच्छेदे सति अस्मर्यमाणकर्तृकत्वाद् इति अनुमानं प्रमाणम्। अयमाशयः यत्र ग्रन्थस्य आदौ अन्ते मध्ये च, नाम अवान्तरप्रकरणान्ते वा ग्रन्थकर्ता स्वनामोल्लेखं कृतवान्

* शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।
[१] बृहदारण्यकोपनिषत्संबन्धभाष्यम्।


*dīpaśikhā*/v7/2024/Provat Kumar Mondal/pp. 14-18

तत्र पौरुषेयत्वे न कश्चिद् विरोधः। यथा अन्नंभट्टप्रभृतिभिः विरचितेषु तर्कसंग्रहादिषु। यत्र च ग्रन्थे कुत्रापि रचयित्रा स्वनामोल्लेखः न विहितः तत्र भवति सन्देहः। तत्रापि यत्र ग्रन्तकर्तारमारभ्य सम्प्रदायाविच्छेदेन स्मर्यते कर्ता तेषु न सन्देहः। यथा पाणिनिप्रभृतिभिः विरचितेषु अष्टाध्यायीप्रभृतिषु। परन्तु सम्प्रदायाविच्छेदेऽपि कर्ता न स्मर्यते चेद् अवश्यं कर्तुः अभावः एव तत्र कारणं स्यात्। वेदस्य च सम्प्रदायाविच्छेदेऽपि कर्तुः अस्मरणाद् अपौरुषेयता स्वतः सिद्धा। न च अनादरवशाद् न स्मर्यते कर्ता इति वाच्यं यस्य वेदस्य अक्षरशोऽपि विस्मरणं न स्याद् इति धिया यैः महर्षिभिः पदक्रमादयः पाठाः व्यवस्थापिताः तेषां सति वेदकर्तरि अनादरः नैव भवितुं युक्तः। सति तस्मिन् तत्प्रत्ययेन खलु तदा सर्वेषां वेदानर्थानुष्ठानं फलसाधनत्वस्य प्रमाणान्तरागोचरत्वात्। अतः कथम् अर्वाचीनैः असौ विस्मर्येत। तस्मात् कर्तुः अभावमेव अत्र कारणं मन्यामहे।

**नैयायिकः**

नैषः पक्षो युक्तः असिद्धत्वाद् हेतोः अपौरुषेयत्वसाधकस्य। तथाहि किमिदम् अस्मर्यमाणकर्तृकत्वं नाम। किम् अस्मरणगोचरकर्तृकता सा अथवा अप्रमीयमाणकर्तृकता। अयमाशयः वेदकर्ता किं स्मृतेः अविषयः अथवा प्रमायाः अविषयः। तत्र अप्रमीयमाणकर्तृकत्वमिति वक्तुं न शक्यते। परमेश्वरविषयप्रमायाः सत्त्वात्। तथाहि श्रुतयः –

१) "अस्य महतो भूतस्य निःश्वसितमेतद्यदृग्वेदो यजुर्वेदः।" (बृहदारण्यकोपनिषत् २.८.१०)

२) "तस्माद्यज्ञात्सर्वहुतः ऋचः सामानि जज्ञिरे। छन्दांसि जज्ञिरे तस्माद्यजुस्तस्मादजायत।" (तैत्तिरीयारण्यकम् २.१२)

३) "तस्मात्तपस्तेपानात्त्रयो वेदाः अजायन्त।" (बृहदारण्यकोपनिषत् १.२.५) इत्याद्याः।

यदि च अस्मरणगोचरकर्तृकत्वम् अस्मर्यमाणकर्तृकत्वम् इति ब्रूयाः तदा प्रश्नः किम् एकेन न स्मर्यते सः उत सर्वैः। नाद्यः यो धर्मशीलो जीतमानरोष इत्याद्यासु मुक्तकोक्तिषु व्यभिचारात्। नापि द्वितीयः। सर्वे एव न स्मरन्ति वेदकर्तारम् इति सर्वज्ञाद् अन्यः कथं जानीयात्। अतः हेतुः असिद्धः। अलं तेन च अपौरुषेयत्वसाधने।

**मीमांसकः**

इदमत्र भवाद्भिः उच्यतां किमिदं पौरुषेयत्वं नामेति। तत् किं पुरुषाद् उत्पन्नत्वमात्रम् अर्थात् पुरुषोच्चारणविषयत्वं यथा अस्मदादिभिः अहरहः उच्चार्यमाणस्य वेदस्य। अथवा प्रमाणान्तरेण अर्थम् उपलभ्य तत्प्रकाशनाय रचितत्वं वा। प्रथमे न विप्रतिपत्तिः। तादृशपौरुषेयत्वस्वीकारेऽपि पुरुषस्वातन्त्र्याभावेन अस्मदभिमतापौरुषेयत्वस्वीकारे न कश्चिद् दोषः। अपरपक्षे च किम् अनुमानेन तत्र अर्थोपलब्धिः अथवा आगमबलात्। उभयथापि न सम्भवति। यतो हि प्रमाणान्तरागोचरार्थप्रतिपादकं हि वाक्यं वेदवाक्यम्। तत् प्रमाणान्तरगोचरार्थकम् इति साध्यमाने मम माता वन्ध्या इतिवद् वदतो व्याघातः। अथ भवदुक्तानुमानेन वेदवाक्यानि पौरुषेयाणि वाक्यत्वात् कालिदासवाक्यवद् इत्यनेन सत्प्रतिपक्षः। नैष दोषः भवदुक्तानुमानस्य व्यभिचारशङ्कानिवर्तकतर्काभावाद् जन्यज्ञानमूलत्वेन

सोपाधिकत्वात् च। यानि च वेदपौरुषेयत्वसाधकानि श्रुतिवाक्यानि उदाहृतानि तेषामपि अर्थवादत्वाद् न कश्चिद्दोषः।

**नैयायिकः**

किञ्च वेदे वनस्पतयः सत्रमासते सर्पाः सत्रमासते इति वनस्पतीनां सर्पाणां च सत्रानुष्ठानवर्णनमुपलभ्यते। प्रत्यक्षादिप्रमाणविरुद्धश्च स अर्थः। अतः उन्मत्तबालतुल्यं वेदवाक्यमिति भ्रमप्रमादादिदोषाः वेदेऽपि सन्ति इति तेषां पौरुषेयत्वम्। किञ्च काठककलापतैत्तिरीयादिसमाख्याः अपि वेदपौरुषेयत्वं प्रमापयन्ति। अयुक्ता च समाख्यायाः प्रवचननिमित्तता। प्रवचनस्य अनेकपुरुषसाधारणत्वात् काठकादिविशेषणायोगात्। कर्तृत्वे तु एक एव कर्ता इति युक्तं विशेषणम्। तथाहि वाक्ये किं कर्तृत्वं पुंसः इति चेद् यस्तावत् स्वतन्त्रः सन् पदानि वाक्यत्वेन रचयति स एव खलु कर्ता भवति। स्वातन्त्र्यं च एकस्यैव इति युक्तं विशेषणम्। यस्तु अनेन यथोच्चारितं तथैव अहमपि उच्चारयामि इति उच्चारयति नूनं न स कर्ता भवति। तथाभूतोच्चारणं नैकेषां सम्भवति इति विशेषणानुपपत्तिः। तस्मात् कर्तृनिमित्ता एव समाख्या अवगन्तव्या तत्र तत्र। अथ तेषां कठकलापादीनां सर्वज्ञत्वविशयः तदा ईश्वरः एव तत्कर्ता इति अङ्गीक्रियताम्। न च परमेश्वरस्य वेदकर्तृत्वे तस्य ताल्वादिस्थानाभावेन वर्णोच्चारणासम्भवात् कथं तदुच्चारणविषयत्वं वेदस्य इति वाच्यं स्वभावतः अशरीरस्यापि तस्य भक्तानुग्रहार्थं लीलाविग्रहधारणस्य वक्तुं शक्यत्वात्।

**मीमांसकः**

न तावत् काठककलापादिसमाख्यावशात् पौरुषेयत्वं वेदस्य। अध्ययनसम्प्रदाय-प्रवर्तकविषयत्वेन तासाम् उपपत्तेः। अर्थाद् यद्यपि सा सा शाखा कठादिभिः न विरचिता तथापि तासाम् अध्ययनसम्प्रदायकर्तृत्वेन तासु कठादिकर्तृत्वम् उपचर्यते। प्रवचने एव अतिशययोगेन असाधारण्यं कठादीनां सम्भवति इति न विशेषणानुपपत्तिः। किञ्च यद् उक्तम् ईश्वरस्य भक्तानुग्रहार्थं लीलाविग्रहधारणमिति तदपि देशकालस्वभावविप्रकृष्टार्थग्रहणोपायाभावाद् अतीन्द्रियार्थदर्शनं न सम्भवति परमेश्वरस्य। न च ईश्वरस्य चक्षुरादिकमेव तथा प्रतीतिं जनयेत्। दृष्टानुसारेणैव कल्पना इति न्यायात्। तथाहि लोके यः यत्सामर्थ्यविशिष्टो दृष्टः स स्वविषयान् अतिक्रम्य एव दूरसूक्ष्मादिदृष्टौ कारणं भवेद्, न तु स्वविषयातिक्रमणे। न हि कदाचिदपि रूपं श्रोत्रेण गृह्यते। तथाह्युक्तम्–

यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्।
दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता॥[२] इति।

अपि च ये तावत् पौरुषेयतां मन्यन्ते वेदस्य तेऽपि परम्परया तत्र कर्तृविशेषं स्मर्तुं न शक्नुवन्ति खलु। सर्वे स्वाभिमतमेव कर्तारं निक्षिपन्ति तत्र। तथाहि केचन ईश्वरः तत्कर्ता इति वदन्ति अन्ये हिरण्यगर्भं तत्कर्तृत्वेन मन्यन्ते अपरे च प्रजापतिम्। नैवंविधो विवादः परम्परया स्मर्यमाणेषु पाणिनिप्रभृतिकर्तृषु उपलभ्यते। तस्मान्न ईश्वरादिकृतो वेदः। यच्चोक्तं वनस्पतिसर्पादीनां सत्रानुष्ठानवर्णनाद् वेदस्य उन्मत्तवाक्यतुल्यता ततश्च पौरुषेयता इति

[२] सर्वदर्शनसंग्रहः, जैमिनिदर्शनम्, पुटम् २७४

तदप्यसद्, वनस्पतयः सत्रमासते इत्यादिश्रुतीनाम् च अर्थवादपरत्वात्। अचेतनाः वनस्पतयः अपि सत्रमासते किं पुनर्विद्वांसो ब्राह्मणा इति स्तुतिपरा एव ताः।

**नैयायिकः**

स्यादेतदेवम् अनित्यत्वात् खलु शब्दानां पौरुषेयत्वं स्याद् वेदस्य। शब्दानाम् अनित्यत्वेन शब्दराशिसमूहस्य वेदस्यापि अनित्यतापातात्। अनित्याश्च शब्दाः उत्पत्तिविनाशशालित्वाद् घटवत् इति। शब्दस्य च उत्पत्तिविनाशौ प्रत्यक्षसिद्धौ। उत्पन्नः शब्दः निवृत्तः कोलाहलः इति। न च निवृत्तः कोलाहलः इत्यत्र शब्दप्रध्वंसाभावः न प्रतीयते अभावप्रत्यक्षे आश्रयप्रत्यक्षस्य कारणत्वात्, प्रकृते तु आश्रयस्य आकाशस्य अप्रत्यक्षत्वाद् इति वाच्यं वायोरचाक्षुषत्वेऽपि तद्गतरूपाभावस्य चाक्षुषत्वदर्शनेन उक्तकार्यकारणभावस्य अग्रहणात्। अतः उत्पत्तिविनाशवत्त्वाद् अनित्यः एव शब्दः। इन्द्रियग्राह्यविशेषगुणत्वादपि शब्दः चक्षूरूपवद् अनित्यः। न च सोऽयं गकार इत्यादिप्रत्यभिज्ञाबलात् शब्दनित्यत्वम् आस्थेयम्। तस्याः जातिनिबन्धत्वात्। एवं तारत्वह्रस्वत्वविरुद्धधर्मवत्त्वाद् अपि ते अनित्याः। शब्दानां चानित्यत्वे स्वतः सिद्ध्यति वेदस्य पौरुषेयता।

**मीमांसकः**

सत्यम् आपातरमणीयमेतत्। नहि अनुमानबलात् शब्दस्य अनित्यता साधयितुं शक्या, सोऽयं गकारः इत्यादिप्रत्यभिज्ञाविरोधप्रसङ्गात्। न च समाहितमेव तत्र सामान्यनिबन्धना सा इति वाच्यं प्रत्यभिज्ञायाः समान्यनिबन्धत्वनियमाभावात्। तत्रैव प्रत्यभिज्ञा तन्निबन्धना गृह्येत यत्र बलवद्बाधकं व्यभिचारो वा वर्तते। बलवद्बाधकं च दृढतरप्रमाणेन व्यक्तिभेदनिश्चयः। व्यभिचारदर्शी यथा सोऽयं केश इति। नहि क्वचिद् लभ्यमानः व्यभिचारः नियमायते। तथाहि क्वचिद् व्यभिचारं दृष्ट्वा तेन नियमव्यभिचारम् अवगम्य तावता यत्र व्यभिचारो नास्ति तत्रापि व्यभिचारं कञ्चित् प्रकल्प्य दूषणम् अयुक्तं खलु। एवञ्च स एवायमिति प्रत्यभिज्ञा हि ऐक्ये सत्येव भवति इति नियमः। क्वचिद् बाधे सति स त्यज्यते। गकारादिव्यक्तीनां प्रतिपुरुषं भेदोपलब्धिरपि अत्र न बलवद्बाधकायते तस्याः नादनिदानत्वात्। यच्चोक्तं तारत्व-ह्रस्वत्वविरुद्धधर्माध्यासात् तत्सिद्धिः। तत्र प्रष्टव्यं किं स विरुद्धधर्माध्यासः स्वाभाविकः अथवा प्रातीतिकः। स्वाभाविकश्चेत् असिद्धिः। अन्यथा चैत्रः दश गकारान् उदचारयद् इति प्रतीतिः स्याद् न तु दशकृत्वो गकारान् पठति इति। अथ प्रातीतिको विरुद्धधर्माध्यासः न तेन स्वाभाविकैक्यहानिः। न हि परोपाधिभेदेन स्वाभाविकम् ऐक्यं विहन्यते। अन्यथा घटाद्युपाधिभेदतः आकाशस्यापि स्वाभाविकः भेदः स्यात्। एवं सोऽयं गकारः इति प्रत्यभिज्ञा एव शब्दानित्यानुमानानि सर्वाणि बाधते। तदुक्तम्-

प्रत्यभिज्ञा यदा शब्दे जागर्ति निरवग्रहा।
अनित्यत्वानुमानानि सैव सर्वाणि बाधते॥[३] इति।

नापि समीचीनम् उदयनमतम्। व्यञ्जकध्वनिरूपोपाधिगताः तारत्वमन्दत्वादिविरुद्धधर्माः यथा शब्दे वस्तुतः न सन्तोऽपि भासन्ते तथैव तद्गतौ उत्पत्तिविनाशौ अपि शब्दे भासेते इति

[३] सर्वदर्शनसंग्रहः, जैमिनिदर्शनम्, पुटम् २७७

उत्पन्नः शब्दः निवृत्तः कोलाहलः इति व्यवहारः सिद्ध्यति। यश्च इन्द्रियग्राह्यविशेषगुणत्वलिङ्गेन अनित्यत्वं शब्दानाम् अनुमितं तद् असाधु, हेतोः स्वरूपासिद्धत्वात्। तथाहि मीमांसकाः वर्णात्मकस्य शब्दस्य द्रव्यत्वम् इच्छन्ति। एवं माध्वाः अपि। तथा च शब्दस्य गुणत्वाभावे कुतः इन्द्रियग्राह्यविशेषगुणत्वम्। यदि च ध्वन्यात्मकः शब्दः तदापि सिद्धसाधनता अस्मन्मतेऽपि तस्य अनित्यत्वात्। किञ्चात्र अश्रावणत्वम् उपाधिः भवति। तथाहि यत्र अनित्यत्वं तत्र अश्रावणत्वं यथा घटे। यत्र इन्द्रियग्राह्यविशेषगुणत्वं तत्र न अश्रावणत्वमिति नास्ति शब्दे व्यभिचारात्। सोपाधिकत्वात् च व्याप्यत्वासिद्धोऽयं हेतुः। नापि वा नित्यत्वे शब्दस्य व्यापकत्वात् सर्वदा सर्वत्रोपलब्धिप्रसङ्गः ध्वनिसंस्कृतस्य एव तस्य उपलम्भाङ्गीकारात्। अतः नित्यः शब्दः नित्यश्च वेदः अपौरुषेयश्च।

## उपसंहारः

एवं वेदस्य पौरुषेयत्वापौरुषेयत्वविषये नैयायिकानां मीमांसकानां च रुचिकरः संवादः यथामति यथासंक्षेपं चात्र निरूपितः। तत्र इदम् अवधेयं, नात्यन्तं वेदस्य ईश्वरकारणत्वे विमतिपोषकाः मीमांसकाः अपि तु स्वातन्त्र्यपक्षे एव। तथाहि उक्तं कुमारिलभट्टपादैः - "यत्नतः प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता"[४] इति। तथा च इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकोपायानां प्रकाशकः वेदः मन्त्रब्राह्मणात्मकः अपौरुषेयः नित्यश्च इत्येष एव सिद्धान्तः मीमांसकानाम् इति शिवम्।

[४] श्लोकवार्तिकम् २८६


*dīpaśikhā*/v7/2024/Provat Kumar Mondal/pp. 14-18

# निरुक्तशास्त्रस्य सामान्यपरिचयः

अनिरुद्धः वन्द्योपाध्यायः*

## भूमिका

षट्सु वेदाङ्गेषु अन्यतमं निरुक्तं पदं कुरुते। ऋषिणा यास्केन रचितं निरुक्तम् इदम्। निरुच्यते निश्शेषेण उपदिश्यते तत्तदर्थानाम् अवबोधनाय पदजातं यत्र तद् निरुक्तम् इति कथ्यते। निरुक्तस्य भागत्रयं वर्तते, यथा- नैघण्टुककाव्यम्, नैगमकाण्डम्, दैवतकाण्डम् इति। तथाहि अनुक्रमणिकाभाष्ये उच्यते-

आद्यं नैघण्टुकं काण्डं द्वितीयं नैगमं तथा।
तृतीयं दैवतञ्चेति समाम्नायस्त्रिधा स्थितः॥ इति।

अतः निरुक्तस्य त्रीणि काण्डानि इति उच्यते। प्रत्येकस्मिन् काण्डे अध्यायाः वर्तन्ते। नैघण्टुकाण्डे पञ्च अध्यायाः, नैगमकाण्डे षट् अध्यायाः, दैवतकाण्डे षट् अध्यायाः च वर्तन्ते। आहत्य निरुक्ते सप्तदश अध्यायाः विद्यन्ते।

## नैघण्टुक-काण्डम्

प्रथमतः पञ्चाध्यायात्मकं वर्तते नैघण्टुक-काण्डम्। शब्दार्थकाण्डम् इति तस्य नामान्तरम्। पर्यायवाचिशब्दाः काण्डे अस्मिन् वर्तन्ते।

अर्थावबोधे निरपेक्षतया पदजातं यत्र उक्तं तद् निरुक्तम् इति। अन्यत् च, एकैकस्य पदस्य सम्भाविता अवयवार्थाः यत्र निश्शेषेण उच्यन्ते तदपि निरुक्तम् इति। अमरकोषग्रन्थे, वैजयन्तीग्रन्थे, हलायुधग्रन्थे एवं प्रकारेण निघण्टुशब्दः व्याख्यातः। निघण्टौ प्रथमकाण्डे पर्यायवाचिशब्दाः सन्ति। पृथिव्याः एकविंशतिः पर्यायाः भवन्ति। यधा- गौः, ग्मा, ज्मा, क्ष्मा, क्षा, क्षमा, क्षोणी, क्षितिः, अवनिः, उर्वी, पृथ्वी, मही, रिपः, अदितिः, इला, निर्ऋतिः, भूः, भूमिः, पूषा, गातुः, गोत्रा चेति। एवं सुवर्णस्य पञ्चदश, अन्तरिक्षस्य षोडश, रात्रेः त्रयोविंशतिः, दिवसस्य द्वादश, उषःकालस्य षोडश पर्यायाः भवन्ति। विशेष्यपदवत् क्रियापदानाम् अपि पर्यायाः उल्लिखिताः। यथा- गमॣ गतौ इति धातोः १२२ पर्यायाः भवन्ति। निघण्टोः चतुर्थे पञ्चमे च अध्याये वैदिकशब्दाः प्राप्यन्ते।

किंवदन्तीनये निघण्टोः निरुक्तस्य च व्याख्याता यास्काचार्यः इति। अपि च तद् उभयं निरुक्तम् इति नाम्ना अभिधीयते। किन्तु स्कोल्ड्, डॉ लक्षणस्वरूपः इत्येतेषां मते, नैगमकाण्डस्य दैवतकाण्डस्य च व्याख्याता यास्कः। तदेव यास्केन नैघण्टुककाण्डारम्भे उक्तम्- ‘समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते’ इति। यास्कात् पूर्वं पञ्चाध्यायात्मकः निघण्टुः अन्येन ऋषिणा रचितः। एतस्य व्याख्यानस्य नाम निरुक्तं, यत्

* स्नातकोत्तरच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।


*dīpaśikhā*/v7/2024/Aniruddha Bandyopadhyay/pp. 19-21

यास्केन विरचितम्। अयं निघण्टुः वर्तते अमरकोषः, वैजयन्ती, हलायुधः, मेदिनीकोषः चेति कोषग्रन्थानां मूलम्। नैघण्टुक-काण्डे यास्केन नाम, आख्यातं, निपातः, शब्दनित्यत्वं चेति व्याकरणविचाराः आलोचिताः सन्ति।

## नैगमकाण्डम्

निगमः इत्युक्ते वेदः। बहुत्र यास्काचार्येण वेदः इत्यस्मिन् अर्थे निगमशब्दः उक्तः। यथा इत्यपि निगमः भवति इति। अतः वेदे विद्यमानाः शब्दाः नैगमकाण्डे प्राप्यन्ते। तेषां व्युत्पत्तिः-अर्थः, दृष्टान्तः, मन्त्राः चेति व्याख्याताः। यास्काचार्यः शब्दप्रयोगकाले वेदमन्त्राणां निरूपणम्, अपि च मन्त्रे विद्यमानानां सर्वेषां शब्दानां व्याख्यानम् अकरोत्। यथा, जहा इति। तस्यार्थः जघान इत्युक्ते हतवान् इति। प्रसङ्गे अस्मिन् नैगमकाण्डस्य प्रथमाध्याये वेदमन्त्रः उक्तः-

को नु मर्या अमिथितः सखा सखायमब्रवीत्। जहा को अस्मदीषते॥ इति।

तत्र मर्या, अमिथितः, ईषते इति समेषां व्याख्यानं प्रसङ्गे अस्मिन् कृतम्।

## दैवतकाण्डम्

निरुक्तस्य तृतीयकाण्डं दैवतकाण्डम् इति पदेन व्यपदिश्यते। काण्डे अस्मिन् यास्काचार्यः देवतातत्त्वस्य निरूपणं कृतवान्। भूलोकः अन्तरीक्षलोकः, द्युलोकभेदेन देवतायाः लक्षणकार्यस्वरूपस्थानरूपाणि प्राप्यन्ते। अस्य काण्डस्य पठनेन वैदिकयुगे स्थितानाम् ऋषीणां विषये जायते। अग्निदेवः पृथिव्यां वर्तते, सः च अस्माकं सामीप्यदेवः। दूरदेशस्थानीयत्वेन सूर्यः द्युलोके विराजते। अग्निसूर्ययोः मध्ये एव सर्वे देवाः विराजन्ते भूलोकस्य प्रधानदेवता अग्निः, अन्तरीक्षलोकस्य वायुः इन्द्रश्च, द्युलोकस्य सूर्यः आदित्यः वा। एते देवाः परमात्मनः अंशाः, न तु स्वतन्त्राः। यास्केन प्रोक्तम्- देवतायाः एक आत्मा बहुधा स्तूयते, एकस्य आत्मनः अन्ये देवाः प्रत्यङ्गानि भवन्ति इति। मन्त्रविशेषे देवताः कदाचित् सगुणाः, कुत्रचित् निर्गुणाः अपि प्राप्यन्ते।

वेदोक्तदेवाः प्रकृतेः प्रपञ्चमात्रम्। यथा वातप्रकोपस्य देवता मरुत्, वज्रस्य देवता रुद्रः, दिवाकालिनः सूर्यः मित्रः, पुनश्च रात्रिकालिनः सूर्यः वरुणः चेति वर्तते। नैके पण्डिताः एतादृशं व्याख्यातं नाङ्गीकुर्वन्ति। परन्तु द्विसहस्रवर्षपूर्वात्मककाले यास्काचार्येण वैदिकदेवतायाः विवरणं व्याख्यातम्। दैवतकाण्डे वृत्रासुरहननविषये उक्तं यत्-

'तत् को वृत्रः? मेघः इति नैरुक्ताः। त्वाष्ट्रोऽसुर इति ऐतिहासिकाः। अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते। तत्रोपमार्थेन युद्धवर्णा भवन्ति' इति। एवम् इन्द्रेण वृत्रासुरः हतः इति रूपकालङ्कारेण वर्णितम्।

विज्ञानविषयाः अपि निरुक्ते प्राप्यन्ते। अन्तरीक्षलोकस्य अग्निः पार्थिवाग्निः चेति द्वयोः अग्न्योः मध्ये भेददर्शनार्थं यास्कः आह, उदकेन्धनः शरीरोपशमनः इति विद्युत् अग्निः। उदकोपशमनः शरीरदीप्तिः इति पार्थिवाग्निः। Convex lense इत्यस्य वर्णनम् अपि दैवतकाण्डे अग्निस्वरूपविषये प्राप्यते। तादृशे मणौ तीक्ष्णीकृत-सूर्यरश्मेः प्रभावेण गोमयादौ रश्मिः पतति चेत् तत् प्रज्वलितं दृश्यते। अर्थात् तदानीन्तनकालस्य सौरविज्ञानस्य अपि वर्णनं प्राप्यते। सूर्यचन्द्रयोः विषये उक्तं यत्- अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते...आदित्योऽस्य

दीप्तिर्भवति इति। एवंरूपेण वर्णनं निरुक्ते दृश्यते।

**निघण्टुव्याख्याकाराः**

सम्प्रति निघण्टुग्रन्थस्य एका एव व्याख्या समुपलब्धा वर्तते। अस्याः व्याख्यायाः रचयिता वर्तते देवराजयज्वा इति। यज्ञेश्वरः इति तस्य पिता वर्तते। अयं दक्षिणभारतस्य निवासी आसीत्। तस्य समयकालविषये मतद्वयं प्राप्यते। केषाञ्चिद् विदुषां नये अयं सायणात् परवर्ती आसीत्। परन्तु यथार्थतः सायणात् पूर्ववर्ती एव अयम् आसीत्। आचार्यसायणेन ऋग्वेदस्य स्वकीये भाष्ये निघण्टुभाष्यवचनस्य उल्लेखः कृतः। देवराजयज्वा स्वभाष्यस्य उपोद्घाते क्षीरस्वामिनः तथा अनन्ताचार्यस्य निघण्टुव्याख्यायाः उल्लेखं कृतवान्। यथा- इदं च...क्षीरस्वामी अनन्ताचार्यकृतां निघण्टुव्याख्यां...निरीक्ष्य क्रियते। क्षीरस्वामी अमरकोशस्य प्रसिद्धः टीकाकारः अस्ति। स्वप्रतिज्ञानुसारेण देवराजयज्वा नैघण्टुककाण्डस्य एव निर्वचनम् आधिक्येन विस्तरेण कृतवान्। अन्यकाण्डानां व्याख्या अल्पा वर्तते। सायणात् पूर्ववर्तित्वेन अस्याः व्याख्यायाः तथा निरुक्ते च विशिष्टं महत्त्वम् अस्ति।

**स्वरूपम्**

वैदिककोषस्य भाष्यरूपम् अस्ति निरुक्ताख्यं वेदाङ्गम्। निघण्टौ तु केवलं वैदिकाः शब्दाः परिगणिताः सन्ति। परन्तु निरुक्तकारः यास्कः तेषां वैदिकानां शब्दानां सविस्तरं विवेचनं कृतवान्। अर्थात् निरुक्ते वैदिकशब्दानाम् अर्थज्ञानस्य प्रक्रिया वर्णिता अस्ति। निघण्टोः पञ्चाध्यायानां विवेचनं स्वकीये निरुक्तग्रन्थे यास्केन द्वादशाध्यायेषु सम्पादितम् अस्ति। निरुक्तं गद्यशैल्यां निबद्धम् अस्ति, किन्तु अन्ये वेदाङ्गग्रन्थाः सूत्रशैल्यां निबद्धाः सन्ति।

**कालः**

निघण्टुकालानन्तरं निरुक्तानां समयः प्रारब्धः भवति। दुर्गाचार्यानुसारेण निरुक्तं चतुर्दशसङ्ख्यकम् आसीत्।

**निरुक्तकाराः**

यास्कस्य उपलब्धे निरुक्ते द्वादशनिरुक्तकर्तॄणां नामानि मतानि च निर्दिष्टानि सन्ति। बृहस्पतिः, काश्यपः, औपमन्यवः, औदुम्बरायणः, वार्ष्यायणिः, गार्ग्यः, शाकपूणिः, गालवः, कौत्सव्यः, यास्कः इत्यादयः सन्ति निरुक्तकाराः। इदानीन्तनकाले उपलभ्यते केवलं यास्कप्रणीतं निरुक्तम्।

**प्रयोजनम्**

व्याकरणशास्त्रं निरुक्तस्य अध्ययनेनैव परिपूर्यते। अतः व्याकरणस्य कार्त्स्न्यं निरुक्तस्य एकं प्रयोजनम्। यास्केन निरुक्तस्य प्रयोजनम् उक्तम्। इदम् अन्तरेण मन्त्रेषु अर्थप्रत्ययः न विद्यते। अस्य शास्त्रस्य अध्ययनं विना वेदमन्त्राणाम् अर्थज्ञानं न सम्भवति। यतो हि, शास्त्रे अस्मिन् वैदिकशब्दानां विवरणम् उपदिष्टम्। अपि च वेदार्थेन एव वयं सफलाः भवेम इति उच्यते निरुक्तशास्त्रे।

# पाणिनिपरिचयः

विश्वरूपबेजः*

## भूमिका

पाणिनीयव्याकरणं त्रिमुनिव्याकरणम् इति नाम्नाभिधीयते। यतो हि अस्य व्याकरणस्य संवर्द्धनं त्रिभिः मुनिभिः सूत्रवार्तिकभाष्यरूपेण कृतम्। तत्र 'त्रिमुनि' इति पदेन पाणिनिकात्यायनपतञ्जलयः गृह्यन्ते। व्याकरणशास्त्रे त्रिषु आचार्येषु भगवान् पाणिनिः मूर्धन्यतां भजते। संस्कृतव्याकरणशास्त्रस्य केन्द्रबिन्दुः अयम्। पाणिनेः प्रागपि नैके वैयाकरणाः आसन्। किन्तु महर्षेः पाणिनेः यः सूत्रोपस्थापनक्रमः विद्यते सः नान्यस्य कस्यापि आचार्यस्य अस्ति। अपि च सुन्दर्या मनोरमया सुललितया च शैल्या भगवता सूत्राणि प्रणितानि सन्ति। तेन बाला अपि झटिति शब्दस्वरूपं ज्ञातुं शक्नुवन्ति। पाणिनीयव्याकरणं विद्वज्जगतः एका परमाश्चर्या कृतिः। वोपदेवकृतकविकल्पद्रुमनामाख्ये ग्रन्थे आदौ एव उक्तम्-

इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमरजैनेन्द्राः जयन्त्यष्टौ च शाब्दिकाः॥ इति।

यद्यपि ऐन्द्रव्याकरणं सम्प्रति दुर्लभं तथापि एतस्य बहुत्र नाम प्रयुक्तम् उपलभ्यते। महर्षिपाणिनिस्तु स्वप्राग्वर्तिनां समेषाम् आचार्याणां व्याकरणशास्त्रम् आलोड्य 'विद्याकामः शिवं जपेत्' इति वचनम् अनुसृत्य शिवं च समाराध्य शिवप्रसादात् चतुर्दश सूत्राणि समधिगम्य अष्टाध्यायीं विनिर्ममौ। व्याकरणसूत्रैः ग्रथितस्य अस्य ग्रन्थस्य अष्टौ अध्यायाः सन्ति। अतः ग्रन्थस्य अस्य अष्टाध्यायी अष्टकः वा इति नाम सुप्रसिद्धम्। प्रत्येकम् अध्याये चत्वारः पादाः सन्ति। प्रत्येकं पादे क्रमेण सूत्राणि वर्तन्ते। कथ्यते हि पाणिनीयसंहितायां प्रायः ३९९६ सूत्राणि सन्ति। तथा चोक्तम्-

त्रीणि सूत्रसहस्राणि तथा नवशतानि च।
षण्णवतिश्च सूत्राणां पाणिनिः कृतवान् स्वयम्॥ इति।

अतः व्याकरणसूत्राणां प्रणेता भगवान् पाणिनिः। सूत्राणाम् अर्थं विशदीकर्तुं कात्यायनः मुनिः वार्तिकानि रचयाञ्चकार। तेषु वार्तिकेषु पाणिनिना उक्तस्य अनुक्तस्य दुरुक्तस्य च चिन्ता अस्ति। गच्छता कालेन पाणिनिव्याकरणे विभिन्नेषु स्थलेषु नैके पूर्वपक्षाः समुद्भूताः। तेषां समेषां समाधानाय शेषावतारः भगवान् पतञ्जलिः महाभाष्यं नाम ग्रन्थं प्रणिन्ये। महाभाष्ये पतञ्जलिः पाणिनेः सूत्राणाम्, अपि च कात्यायनस्य वार्तिकानां व्याख्यानं लिलेख। पाणिनिः, वररुचिः, पतञ्जलिः इति मुनित्रयं विराजते। एतैः त्रिभिः मुनिभिः कृतभूरिपरिश्रमैः निर्मितं व्याकरणम् इदं 'त्रिमुनिव्याकरणम्' इति नाम्ना सुप्रसिद्धम्। यद्यपि वैयाकरणनिकाये 'यथोत्तरं मुनीनां प्रामाण्यम्' इत्यभ्युपगमः बहुचर्चितः, तथापि पाणिनेः अपेक्षया कात्यायनस्य, तदपेक्षया च पतञ्जलेः महत्त्वं शीर्षकोटिम् आटीकते इति नैव

* भूतपुर्वच्छात्रः, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।


*dīpaśikhā*/v7/2024/Biswarup Bej/pp. 22-31

वक्तुं शक्यते। कुतः इति चेत् पाणिनीयसूत्राणाम् एव वार्तिक-भाष्याधारत्वात्। अत एव उक्ताभ्युपगमस्य 'उत्तरोत्तर-मुन्यभिप्रेतेऽर्थे पूर्वपूर्वमुनीनां तात्पर्यम्' इत्येव अर्थः सम्प्रधार्यः। एवं हि सत्स्वपि शब्दसाधुत्वप्रक्रियानिर्वाहकेषु एतदतिरिक्तेषु प्रायः शताधिकव्याकरणान्तरेषु लक्ष्यलक्षणात्मकं पाणिनीयव्याकरणम् एव सम्प्रति सर्वाङ्गपूर्णं महतः शब्दपारावारस्य साधुत्वाधिगमे सामर्थ्यशालि वर्तते। अतः विविधव्याकरणशास्त्रकर्तृमहर्षिमणिमालायां मध्यमः सुमेरुः इव महर्षिः पाणिनिः विराजते, यदीयं सर्वाङ्गपूर्णव्याकरणं भारतीयैः वैदेशिकैः च मुहुर्मुहुः संस्तूयते। इतः पूर्वं यथामति पूर्ववर्तिवैयाकरणानां परिचयादिकम् अस्माभिः ज्ञातम्। तदनन्तरं व्याकरणशास्त्रकर्तृषु मौलिमाणिक्यायमानस्य पाणिनेरवतारः स्वीक्रियते तत्तदाचार्यैः। पाणिनेः परवर्तिषु व्याकरणसम्प्रदायेषु अमुष्य नाम सर्वत्र दृशोः विषयतां याति। यद्यपि अनेन स्वकीयपरिचयादिविषये क्वापि किमपि नोल्लिखितं, तथापि परवर्तिभिः आचार्यैः परश्शतैः प्रयत्नैः एतस्य परिचयादिकं यथा स्थिरीकृतं तथाऽत्र निर्दिश्यते।

**पाणिनेः परिचयः**

त्रिमुनिव्याकरणस्य प्रथमः मुनिः सूत्रकारः पाणिनिः। तस्य गृहं शलातुर-नामके ग्रामे आसीत्। शलातुरे भवः शालातुरीयः। अत्र 'तत्र भवः' (अष्टाध्यायी ४.३.५३) इति सूत्रेण छप्रत्ययः भवति। अतः महर्षिः पाणिनिः शालातुरीयः इति नाम्ना अभिहितः। सम्प्रति शलातुरस्य नाम लाहोर् इति जातम्। 'पाणिनिः' इति नाम्नः क्रमविकाशः इत्थमस्ति- पणः> पणिनः> पाणिनः> पाणिनिः। पाणिनिः इति गोत्रनाम। तस्य विशेषनाम आहिकः। तस्य पिता शलङ्कः, पितामहः देवलः, माता दाक्षी, मातामहः दक्षः, मातुलः व्याडिः, सः एव दाक्षिः दाक्षायणः वा, अनुजः तु छन्दस्सूत्रकारः पिङ्गलाचार्यः। पितुः नामानुसारेण पाणिनिः शालङ्किः इति नाम्ना, मातुः नामानुसारेण च दाक्षेयः दाक्षीपुत्रः वा इति नाम्नाऽपि प्रथितः। यथाऽह त्रिकाण्डशेषे पुरुषोत्तमदेवः- 'पाणिनिस्त्वाहिको दाक्षीपुत्रः शालङ्किपाणिनौ' इति। वैजयन्तीकोशे अपि ऊचे- 'शालातुरीयको दाक्षीपुत्रः पाणिनिराहिकः' इति। पाणिनीयशिक्षायाम् उक्तम् अस्ति- 'दाक्षीपुत्र-पाणिनिना येनेदं व्यापितं भुवि' इति। दाक्षी इति दक्षस्य अपत्यं स्त्री इति गोत्रप्रत्ययान्त-दाक्षिशब्दस्य स्त्रियां रूपं भवति। तेन हि पाणिनेः माता दक्षकुलोत्पन्ना आसीद् इति ज्ञायते। सैव व्याड्या अभिधीयते। शालङ्किः इति तु पितृव्यपदेशजं नाम इति केचिद् आहुः। अस्य व्युत्पत्तिः अपि बहुधा कल्पिता अस्ति। एवञ्च व्यवहारपथे पाणिनेः इमानि नामानि सन्ति, तानि च- पाणिनः, पाणिनिः, दाक्षीपुत्रः, शालङ्किः, शालातुरीयः, आहिकश्चेति। श्लोकात्मकपाणिनीयशिक्षायाः याजुषपाठे पाणिनेः पाणिनेयः इति नामापि उपलभ्यते।

1. पाणिनिः इति नाम 'काशिकायाम्' (अष्टाध्यायी ६.२.१४) तथा 'चान्द्रवृत्तौ' (अष्टाध्यायी २.२.६८) समुपलभ्यते।
2. पाणिनिः इत्यस्य विषये नास्ति विदुषां विरोधः। अस्य निष्पत्तौ मतद्वयम् उपलभ्यते। केचन पणिन् शब्दाद् अणि कृते 'इञ्' इति मन्वते। अपरे अकारान्तात् पणिनशब्दाद् 'इञ्' इति स्वीकुर्वते।
3. दाक्षीपुत्रः- 'सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः' इति महाभाष्ये भगवता पतञ्जलिना उद्धृतम्। अन्यच्च- 'दाक्षीपुत्र! वचो व्याख्यापटुर्मीमांसकाग्रणीः' इति


*dīpaśikhā*/v7/2024/Biswarup Bej/pp. 22-31

समुद्रगुप्तविरचिते कृष्णचरिते। अपरत्रापि- 'शङ्करः शाङ्करीं प्रादाद् दाक्षीपुत्राय धीमते' इति पाणिनीयशिक्षायाम्।

4. शालङ्किः- पाणिनिपर्यायवाचकः अयं शब्दः केवलं कोषेषु एव उपलभ्यते नान्यत्र। महाभाष्यकारः तु- 'शालङ्केर्यूनश्छात्राः शालङ्काः' इति निर्दिदेश।
5. शालातुरीयः- असौ शालातुरीयशब्दः तालव्यादिः दन्त्यादिश्च। पाणिनिसंज्ञासूचकः अयं शब्दः काशिकाविवरणपञ्जिकायां, गणरत्नमहोदधौ, भामहस्य काव्यालंकारे च परिलक्ष्यते।
6. आहिकः- पर्यायस्य अस्य विषये पुरुषोत्तमदेवस्य कोषः एव प्रमाणपदवीम् अधिरोहति, नान्यत्र किमपि प्रमाणम् उपलभ्यते।

षष्ठशताब्दीम् आरभ्य चतुर्थशतकस्य प्रथमपादपर्यन्तम् उत्तरपश्चिमभारते फारस्याधिपत्यं चचाल। फलतः तस्य प्रदेशस्य भाषासंस्कृत्योः परिस्थितिः सम्यग् नासीत्। अतः ग्रन्थादि-रचनार्थं यादृशः परिवेशः अपेक्षते तस्यापि अभावः आसीत्। तस्मात् प्रतिभावन्तः पण्डिताः तेषां मर्यादां लब्धुं प्रवलपराक्रान्तानां विद्योत्साहिनां मगधराज्ञाम् आश्रयं प्राप्तवन्तः। एतादृश्याः घटनायाः आभासः नैकेषु आख्यानग्रन्थेषु वर्तते। कनौजस्य राज्ञः महेन्द्रपालस्य सभापण्डितः कविः राजशेखरः काव्यमीमांसा-नामके ग्रन्थे, दशमे अध्याये एकां जनश्रुतिम् उद्धृतवान्। तद्यथा- 'श्रूयते च पाटलिपुत्रे शास्त्रकारपरीक्षा। अत्रोपवर्षवर्षाविह पाणिनिपिङ्गलाविह व्याडिः। वररुचिपतञ्जली इह परीक्षिताः ख्यातिम् उपजग्मुः' इति। अस्य अयमाशयः- पाटलिपुत्रे यस्याः शास्त्रकारपरीक्षायाः कथा श्रूयते तदनुसारेण तत्र उपवर्षः, वर्षः, पाणिनिः, पिङ्गलः, व्याडिः, वररुचिः पतञ्जलिश्च इत्येते परीक्षितरूपेण ख्यातिं लेभिरे इति। उपर्युक्तानि चरित्राणि आश्रित्य विभिन्नेषु आख्यानेषु नैकाः कथाः प्रचलिताः सन्ति।

## गुरुपरम्परा

पाणिनिना स्वशब्दानुशासने द्विधा बहुवचनान्तस्य 'आचार्य' इति पदस्य निर्देशः विहितः। श्रीहरदत्तमतानुसारेण पाणिनिः बहुवचनान्तेन आचार्यपदेन स्वगुरोः उल्लेखं करोति। यथा- 'आचार्यस्य पाणिनेः य आचार्यः स इहाचार्यः गुरुत्वाद् बहुवचनम्।' कथासरित्सागरग्रन्थानुसारेण पाणिनेः गुरोः नाम 'वर्ष' आसीत्। यथा-

अथ कालेन वर्षस्य शिष्यवर्गो महानभूत्।
तत्रैकः पाणिनिर्नाम जडबुद्धितरोऽभवत्॥ इति।

कथाप्रसङ्गश्च इत्थम्- पाटलीपुत्रे वर्षाचार्यस्य नैके शिष्याः आसन्। तेषु पाणिनि-नाम्ना कश्चिद् मूढमतिः, सर्वैः तिरस्कृतः गुरुपत्न्युपदेशेन गोपर्वतं जगाम। यथोक्तं स्कन्दपुराणे-

गोपर्वतमिति स्थानं शम्भोः प्रख्यापितं पुरा।
यत्र पाणिनिना लेभे वैयाकरणिकाग्रता॥ इति।

श्लोकात्मकपाणिनीयशिक्षानुसारं पाणिनिना महेश्वराद् अक्षरसमाम्नायरूपचतुर्दशसूत्राणाम् उपदेशं लब्ध्वा तदाधारेणैव स्वकीयः अष्टाध्यायीग्रन्थः विरचितः। अर्थात् महर्षिः पाणिनिः महेश्वरम् आशुतोषं तपसा प्रसाद्य तत्कृपया कृत्स्नं व्याकरणं लेभे। तथा चोक्तं पाणिनीयशिक्षायाम्-

येनाक्षरसमाम्नायमधिगम्य महेश्वरात्।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः॥ इति।

## शिष्यपरम्परा

पाणिनीयशिष्यपरम्पराविषये अस्माकं ज्ञानम् अतिसीमितम्। तथापि अत्र तत्र अस्मिन् विषये वर्णना उपलभ्यते। प्रथमतः पाणिनिः एकः आदर्शगुरुः आसीत्। तस्य आश्रमे नैके शिष्याः आसन्। सर्वेषां शिष्याणां भरणपोषणादिकार्यं पाणिनिना विहितम्। एतदर्थं भाष्यकारस्य 'ओदनपाणिनीयाः' इति वचनं प्रमाणम्। अस्य पदस्य व्याख्यायां काशिकाकारः वदति- 'ओदनप्रधानः पाणिनिः ओदनपाणिनिः, तस्य छात्रा ओदनपाणिनीयाः' इति। अस्माद् एवं ज्ञायते पाणिनेः आवासिकविद्यालयः पाठशाला वा आसीत्। अस्यां पाठशालायाम् नैके शिष्याः आसन्। प्रायः सर्वेषां छात्राणां शिष्याणां वा कृते पाणिनिना स्वोपज्ञस्य 'अकालक'-व्याकरणस्य स्वयम् अनेकधा प्रवचनं विहितम् आसीत्। यथा चोक्तं महाभाष्ये- "कथं त्वेतत्सूत्रं पठितव्यम्। किम् 'आकडारादेका संज्ञा' इति, आहोस्वित् 'प्राक्कडारात् परं कार्यम्' इति। कुतः पुनरयं सन्देहः ? उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः। केचिदाकडारादेका संज्ञेति, केचित् प्राक्कडारात् परं कार्यमिति।" काशिकायाम् उक्तम्- 'शुङ्गाशब्दं स्त्रीलिङ्गमन्ये पठन्ति, ततो ढकं प्रत्युदाहरन्ति- शौङ्गेय इति। द्वयमपि चैतत् प्रमाणम्, उभयथा सूत्रप्रणयनात्।' पुनः काशिकायां प्रदर्शिताभ्याम्- 'पूर्वपाणिनीयाः', 'अपरपाणिनीयाः' इत्येताभ्याम् उदाहरणाभ्यां प्रतीयते यत् पाणिनिशिष्याणां द्वौ विभागौ बभूवतुः। पुनः विविधान्तरिकबाह्यादिप्रमाणैः ज्ञायते यत् पाणिनिना स्वाष्टाध्यायाः उपरि कस्याश्चिद् वृत्तेः प्रणयनं कृतम्।

तस्य शिष्येषु प्रधानः आसीत् कौत्सः। सः पाणिनीयपाठशालायाम् आवासिकछात्रः आसीत् इति महाभाष्यवचनाद् ज्ञायते। वचनं च 'उपसेदिवान् कौत्सः पाणिनिम्' इति। अत्र जयादित्यः वदति- 'उपसेदिवान् कौत्सः पाणिनिम्। तेन मुक्ते यथाप्राप्तं प्रत्यया भवन्ति- उपसदत्, उपासीदत्, उपससाद। अनूषिवान्कौत्सः पाणिनिम्, अन्ववात्सीत्, अन्ववसत्, अनूवास। उपशुश्रुवान् कौत्सः पाणिनिम्' इति।

मीमांसकमहोदयः कात्यायनं पाणिनेः शिष्यरूपेण वर्णयति। पुनः अयं कतगोत्रोत्पन्नः कात्यायनः पाणिनेः साक्षात् शिष्यः आसीद् इति लघुशब्देन्दुशेखरात् सूच्यते, यथा- वंशः इति।

## देशः

भगवतः पाणिनेः देशविषये पण्डिताः नैकमत्यं भजन्ते। केचित्तु 'तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः' (अष्टाध्यायी ४.३.९४) इति पाणिनीयसूत्रे उल्लिखितं शलातुरग्रामम् एव पाणिनेः जन्मभूमित्वेन ऊरीकुर्वन्ति। किन्तु अयं नोचितः, यतो हि शलातुरशब्दात्तु अभिजने अर्थे एव छण्-प्रत्ययः भवति, न तु निवासे अर्थे। महाभाष्ये अभिजननिवासयोः भेदः स्पष्टतया निरूपितः। जैनग्रन्थलेखकः वर्धमाननामकः कश्चित् गणरत्नमहोदधिनामके ग्रन्थे शालातुरीयशब्दस्य व्युत्पत्तिमेवं प्रदर्शितवान्- 'शलातुरो नाम ग्रामः, सोऽभिजनोऽस्यास्तीति शालातुरीयः तत्र भवान् पाणिनिः इति। अनेन पाणिनिः शलातुराभिजनः इति ज्ञायते। अभिजनो नाम यत्र पूर्वैः ऊषितम्' इति।

युधिष्ठिरमहाभागो हि 'उदक् च विपाशः' (अष्टाध्यायी ४.२.७४), 'वाहीकग्रामेभ्यश्च' (अष्टाध्यायी ४.२.११७) इति सूत्रानुसारं पाणिनिः वाहीकदेशवासी आसीद् इति मनुते। तथा स्वीक्रियते चेदपि काश्चन विप्रतिपत्तयः सम्भवन्ति। केचित्तु पाणिनिं गौडीयम् अपि आमनन्ति किन्तु तत् चिन्त्यम् एव। पश्चिमाञ्चलक्षेत्रे 'पणेना' नामकः कश्चन ग्रामः वर्तते। जैनाः कथयन्ति यद् एतत्परिसरभूमिः एव पाणिनेः जन्मकर्मभूमिः इति। तदपि चिन्त्यम् अस्ति, यतो हि यदि सः औदिच्यः भवेत् तदा सः काशकृत्स्नम् अवश्यमेव स्मरेत्। अतः विविधमतवादेषु निश्चयरूपेण पाणिनेः जन्मस्थानं कुत्र अस्ति इति कथनं तु दुलर्भम् एव। वयं तु एतावद् एव अनुमामः यत् पाणिनेः पूर्वपुरुषाः शलातुरग्रामे प्रत्यूषुः। तेन हि सः शालातुरीयः इति नाम्ना अभिहितः। तस्य पिता पितामहः वा शलातुरं त्यक्त्वा केनापि कारणेन काशीम् अगच्छत्। तत्रैव पाणिनिः जन्म लेभे। ततः एव सः प्रारम्भिकीं शिक्षाम् अवाप्य शास्त्राध्ययनार्थं पाटलीपुत्रं जगाम। अतः महर्षेः पाणिनेः जन्मस्थानं शलातुरः आसीद् इति वक्तुं शक्यते।

**कालः**

पाणिनेः स्थितिकालम् आश्रित्यापि बहुः मतभेदः वर्तते। पाणिनिः कदा अभूद् इति विषयम् आलोड्य नैके ग्रन्थाः प्रणीताः। किन्तु नैकत्रापि विदुषां संवादिता तद्विषये। पौर्वात्य-पाश्चात्यविचक्षणैः महाभारतयुद्धकालाद् अर्थात् कलेः आरम्भाद् एकपञ्चाशद्वर्षपूर्वम् इत्यतः आरभ्य विक्रमपूर्वप्रथमशतकपर्यन्तं पाणिनेः कालोऽनुमितः। तेऽपि स्वमतसमर्थनाय बहुविधं साक्ष्यं प्रस्तुवन्ति। तेषु युधिष्ठिरमहाभागः एकोनत्रिंशच्छतं वर्षपूर्वं, सत्यव्रतः २३५० वर्षपूर्वं, गोल्डस्टुकरः ६५० वर्षपूर्वं, बेलबेलकर-महोदयः ६५० वर्षपूर्वं, भाण्डारकरः ६५० व.पू., वासुदेवशरणः ४५० व. पू., मैक्डोनलः ४५० व. पू., मैक्समूलरः ३०० व. पू., वेवरः २५० विक्रमपूर्वं, कीथः २५० विक्रमपूर्वम्, इत्येते आचार्याः पाणिनिकालविषये एतदेव उक्तवन्तः। कथासरित्सागरानुसारेण पाणिनिः नन्दराजस्य समकालिकः आसीद् इति ज्ञायते। वयं तु विष्णुपुराणश्रीमद्भागवत्-प्रभृतिग्रन्थोदितनन्दाभिषेककालं गणयामहे। तत्रादौ युधिष्ठिरमीमांसकानां मतं संक्षेपेण प्रस्तूयते। युधिष्ठिरः महाभागः स्वमतपुष्ट्ये कानिचन प्रमाणानि प्रदर्शयति। तेषां सारः संक्षिप्ताकारेण उपस्थाप्यते-

१. पाणिनिः नन्दराजस्य समकालिकः अस्ति इति कथासरित्सागरे यदुक्तं तत्तु कथाकारस्य भ्रमः एव। वस्तुतः भ्रमोऽयं बौद्धकालिकगोत्रनामव्यवहारात् समुत्पन्नः स्यात्। एवञ्च पाणिनिवररुच्योः समसामयिकत्वं कदापि न सम्भवति।

२. अष्टाध्याय्यां पाणिनिना सूत्रमेकं प्रणीतं 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (अष्टाध्यायी ६.१.१५४) इति। भाष्यकारस्य भगवतः पतञ्जलेः व्याख्यानुसारेण सूत्रोक्तः 'मस्करी' एव बुद्धदेवस्य समकालिकस्य आजीविक-सम्प्रदायस्य प्रवर्तकः मक्खरी मक्खली वा[१]। मस्करी इति पदस्य प्राकृतरूपं मक्खरी मक्खली वेति। महर्षिपाणिनिः प्रायः क्रि.पू. ५१२ अब्दे ममार। अतः स मस्कर्याः पूर्ववर्ती भवितुं नार्हति। इमं विषयम् आधारीकृत्य युधिष्ठिराचार्यः स्वमतम् उपस्थापयति - बुद्धकालिकमक्खलीशब्दस्य संस्कृतरूपं मस्करिशब्दः पाणिनिना 'मस्करमस्करिणौ वेणुपरिव्राजकयोः' (अष्टाध्यायी ६.१.१५४) इति सूत्रे साधितत्वात्

[१] क्वचित्तु मङ्खरी, मङ्खली इति नामान्तरं दृश्यते।

स हि बुद्धान्तरवर्तीति यदुक्तं तदपि निराधारमेव। तत्र विषयद्वयम् आलोचनीयम्- प्रथमन्तु मङ्खली-शब्दस्य संस्कृतरूपं मस्करी इति चिन्तनं भ्रान्तिमूलकमेव; अपरञ्च मङ्खलीशब्दस्य बौद्धद्योतकत्वमपि निरर्थकमेव। मस्करशब्दस्तु मस्कते इतस्ततो गच्छत्यनेन इत्यर्थे मस्क गतौ इति धातोः अरच्प्रत्यये सिध्यति, तस्यार्थश्च वेणुः इति।

३. 'क्षुद्रमालवात्सेनासंज्ञायाम्' इति गणसूत्रे भगवान् पाणिनिः सिकन्दरपराजयिनीं क्षुद्रमालवसेनां स्मरति। तेन स तदन्तरवर्ती अस्ति इति वेवरमतं चिन्त्यमेव।

४. अष्टाध्याय्यां पाणिनिः 'इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक्' (अष्टाध्यायी ४.१.४९) इति सूत्रे यवनानाम् उल्लेखम् अकरोत्। तेन पाणिनिः सिकन्दरान्तरवर्ती अस्ति इति कीथमतमपि चिन्त्यमेव।

५. 'कुमारः श्रमणादिभिः' (अष्टाध्यायी २.१.७०) इति सूत्रोक्तं श्रमणशब्दं बौद्धैः सह संयोज्य पाणिनिः बौद्धात् परं जज्ञे इति यदुक्तं तदपि चिन्तनीयम्। यतो हि शतपथब्राह्मणे श्रमणस्य उल्लेखः दृश्यते परिव्राड्सामान्यार्थे।

६. राजशेखरस्य अनुश्रुतिरपि अप्रामाणिकी। यतो हि स अर्वाचीनः आसीत्।

७. शौनकः यास्कं, यास्कः शौनकं कौत्सञ्च, पाणिनिः शौनकं, शौनकः व्याडिञ्च सस्मार।

अत एव शौनक-यास्क-व्याडि-पिङ्गल-पाणिनि-कौत्सादीनां समकालिकत्वं विद्यते इति वक्तुं शक्यते। शौनकः अधिसीमकृष्णस्य राज्यकाले विद्यमानः आसीत्। यास्कश्च महाभारते स्मृतः। तेन एतत् सुस्पष्टं यत् महाभारतयुद्धात् परं तृतीयशतकमेव एतेषां स्थितिकालः तस्मात् पाणिनेः कालः प्रायः २९०० ई.पू. इति मन्यते।

एवं प्रकारेण युधिष्ठिरमहाभागः स्वमतं प्रास्तावीत्।

एवं स्वकीयप्रमाणपुञ्जैः समये समये विद्वद्भिः स्वानि स्वानि मतानि प्रदर्श्य महर्षिः पाणिनिः समभ्यर्चितः। मन्ये भाविनि काले च गवेषकाः पन्थानम् इममनुसृत्य किमपि नवीनं प्रामाणिकञ्च पाणिनेः कालनिर्धारणं विधास्यन्तीति।

## मृत्युः

आचार्यस्य पाणिनेः जीवनस्यान्त्येतिवृत्तं किमपि नोपलभ्यते, किन्तु पञ्चतन्त्रे मित्रसम्प्राप्तौ प्रसङ्गतः कस्माच्चित् प्राचीनग्रन्थात् पद्यमेकम् उद्धृतम् अस्ति, यत्र पाणिनेः जैमिनेः पिङ्गलस्य च मृत्युकारणानाम् उल्लेखः वर्तते। तथाहि-

सिंहो व्याकरणस्य कर्तुरहरत् प्राणान् प्रियान् पाणिनेः,
मीमांसाकृतमुन्ममाथ सहसा हस्ती मुनिं जैमिनीम्।
छन्दोज्ञाननिधिं जघान मकरो वेलातटे पिङ्गलम्,
अज्ञानावृतचेतसामतिरुषां कोऽर्थस्तिरश्चां गुणैः॥

(पञ्चतन्त्रम्, मित्रसम्प्राप्तिः, श्लोकः, ३६)

एतेन पाणिनिं कश्चन सिंहो जघान, मृत्युश्च तस्य त्रयोदश्यां तिथौ एव अभूद् इति प्रतीयते। अत एव काश्यादिषु अद्यापि प्राचीनपरम्परागतवैयाकरणाः त्रयोदश्यां व्याकरणं न पठन्ति। अतः ते त्रयोदशीतिथिं व्याकरणानध्ययनदिवसरूपेण विवेचयन्ति। किञ्च वनारसहिन्दुविश्वविद्यालये

अद्यापि इयं तिथिः व्याकरणानध्ययनदिवसरूपेण गण्यते।

## पाणिनिविषये लोकोक्तयः

'भवन्ति भव्येष्वनेकाः किम्वदन्तयः' इति नियमात् पाणिनिविषये बह्व्यः किम्वदन्तयः प्रचलिताः सन्ति। तथा च बाल्यशिक्षासमाप्त्यनन्तरं शास्त्राध्ययनार्थं पाणिनिः तक्षशिलाम् आगतवान्। तक्षशिला तदानीन्तनकाले विद्यायाः अतिप्रसिद्धं केन्द्रस्थानमासीत्। प्राचीनभारतस्य प्रसिद्धेषु पण्डितेषु बहवः एव इतः पठिताः आसन्। शलातुरात् तक्षशिला बहु दूरं नासीत्। बाल्यकालादेव पाणिनेः इच्छा आसीद् यत् स एकः महान् वैयाकरणो भविष्यतीति। किन्तु शिक्षासमाप्तेः पूर्वमेव विदेशि-यवनानाम् अत्याचारेण स भयात् तक्षशिलां त्यक्त्वा मगधं जगाम। तत्र कश्चन हस्तरेखाविद् आसीत्, तं पाणिनिः पप्रच्छ यत् स भविष्यति महान् वैयाकरणो भवितुम् अर्हति न वा इति। तस्माद् हस्तरेखाविदः नेतिवाचकम् उत्तरं श्रुत्वा पाणिनिः व्यथितः सञ्जातः। पुनः तेन हस्तरेखावित् पृष्टः यत्- 'हस्ते कीदृशी रेखा भवेत् चेत् महान् वैयाकरणो भवितुम् अर्हामि?' इति। तदनुसारेण पाणिनिः छुरिकया हस्ते नूतनां रेखाम् अङ्कयामास। ततः परं स पाटलिपुत्रे वर्षोपाध्यायस्य सन्निधिं ससर्ज। शङ्करस्वामिनः द्वौ पुत्रौ- वर्षः उपवर्षश्च। उपवर्षः स्वल्पवयसि एव पण्डितः सञ्जातः आसीत्। एवञ्च पूर्वमीमांसायाः उत्तरमीमांसायाश्च व्याख्यां लिखित्वा महतीं ख्यातिम् अविन्दत। किन्तु वर्षः अन्तरेण पठनम् अधिकवयसि अपि सर्वैः 'मूर्खः' इति नाम्ना हेडितः आसीत्। अन्ततो गत्वा स्वामिकुमारः भगवतः कार्तिकस्य आराधनया सशर्तं शास्त्रविद्याम् असर्जत्। तत्र शर्तम् आसीद् यत्- आदौ सकृद्ग्राहिणां छात्राणां समक्षं तस्य लब्धविद्या प्रकाशयितव्या इति।अन्यत्र भगवता शंकरेण देव्याः पार्वत्याः समीपं कथितं 'सप्तविद्याधरचरितं' गुप्तरूपेण श्रवणार्थं शिवानुचरः पुष्पदन्तः तस्य मित्रं माल्यवान् च पार्वत्याः शापवचनाद् मनुष्यगर्भे जनिं लेभे। पुष्पदन्तः कौशाम्ब्यां कात्यायनगोत्रीयस्य कस्यचिद् विप्रस्य गृहे जन्म प्राप्तवान्। अतः वररुचिः 'कात्यायनः' इति नाम्ना सुप्रसिद्धः। माल्यवान् अपि ब्राह्मणकूले जन्मग्रहणपूर्वकं सर्वविद्यायाः ज्ञानम् अर्जित्वा दक्षिणभारते सातवाहनवंशीयस्य राज्ञः मन्त्रित्वम् अलभत। अतः माल्यवान् 'गुणाढ्यः' इति नाम्ना सुपरिचितः।

बाल्यकाले एव वररुचेः पिता ममार। तस्मादेव तस्य धीशक्तिः प्रकाशिता जाता। वेतसीनगर्याः द्वौ अधिवासिनौ आस्तां- देवस्वामी करम्भश्च। अनयोः यथाक्रमम् इन्द्रदत्तः एवञ्च व्याडिः इत्याख्यौ द्वौ पुत्रौ जज्ञाते। अमू द्वौ कमपि विषयं वारद्वयं वारत्रयं वा श्रुत्वैव स्मर्तुम् अशक्नुताम्। अनयोरपि बाल्यावस्थायां पितुः मृत्युः जातः। अतः इमौ द्वौ शास्त्राध्ययनार्थं भगवतः कार्तिकस्य उपासनां चक्रतुः। तस्मिन् समये आभ्यां स्वप्नादेशः प्राप्तो यत्- 'पाटलिपुत्रनगरं गत्वा, तत्र वर्षस्य सकाशाद् अभीष्टविद्यां लभेताम्' इति। तदनुसारेण तौ पाटलिपुत्रं गतवन्तौ। किन्तु तत्र गत्वा तौ ज्ञातवन्तौ यत्- 'यावत्पर्यन्तं वर्षोपाध्यायः सकृद्ग्राहिणं छात्रं न प्राप्स्यति तावत्पर्यन्तं स पाठनं नारप्स्यते' इति। एतच्छ्रुत्वा व्याडीन्द्रदत्तौ तादृशं सकृद्ग्राहिणं छात्रम् अन्वेष्टुं कौशाम्बीम् आगतवन्तौ। तत्रागत्य भाग्यक्रमेण वररुचिणा साकं तयोः साक्षात्कारः जातः। ततश्च वररुचिं नीत्वा वर्षस्य समीपम् आगतवन्तौ। वर्षसकाशाद्

उच्चविद्यां लब्ध्वा वररुचेः ख्यातिः दूरं दूरं प्रसृता जाता। ततः परं दूराद् बहवः विद्यार्थिनः आगच्छन्तः आसन् वर्षोपाध्यायस्य पार्श्वे पठनार्थम्। अस्मिन् काले पाणिनिः अपि तत्रोपस्थितः आसीत्। तस्य मूर्खताहेतुः स वर्षशिष्यैः हेडितः सन् ततः विताडितः आसीत्। पाणिनिः कामपि विद्यां प्रकटयितुं प्रयतते स्म। किन्तु कात्यायनादयः वर्षशिष्याः ऐन्द्रव्याकरणस्य छात्राः आसन्। व्याकरणेन साकं पाणिनेः परिचयः नासीत्। एवञ्च व्याकरणविषये साधारणं ज्ञानमपि तस्य तथा नासीत्। एतत् सर्वं विचिन्त्य पाणिनिः स्वयं लज्जाम् अनुभवति स्म। ततः तेन भगवतः शंकरस्य उपासना आरब्धा। भगवान् महादेवः पाणिनेः कठोरोपासनया सन्तुष्य तं किमपि वरं याचितुम् उक्तवान्। तदा पाणिनिः स्वकीयम् अभिप्रायं भगवत्समीपे प्रकटितवान्। अतः खण्डपरशुः चतुर्दशवारं स्वढक्कां वादयाञ्चकार। तस्य ढक्कावादनेन युगपद् उद्देश्यद्वयं सिषेध, तद्यथा- यदा पाणिनिः शिवस्य आराधनायां रतः आसीत् तदा सनकादय ऋषयः अपि विशुद्धात्मतत्त्वप्रत्यक्षार्थं सुदीर्घतपस्यायां रताः आसन्। चन्द्रशेखरः एतादृशान् ऋषीन् एवञ्च पाणिनिं युगपद् वरदानं कर्तुम् इच्छुकः सन् ढक्कां वादयाञ्चकार। तेन व्याकरणार्थिनः पाणिनेः एवञ्च तत्त्वार्थिनां सनकादीनां मनोरथः पूर्णः जातः। महर्षिः पाणिनिः ढक्कानादं श्रुत्वा 'अइउण्' इत्यादीनि चतुर्दश सूत्राणि प्रणिनाय। एतानि सूत्राणि महेश्वरप्रदत्तानि, अत एव 'महेश्वरादागतानि माहेश्वराणि' इत्यनुसारं माहेश्वरसूत्राणि इति कथ्यते। तदाश्रित्य पाणिनिः व्याकरणरचनायां मनोयोगी सञ्जातः। किञ्चित् कालाद् अनन्तरं स महान् वैयाकरणः सञ्जातः। ततः परं स एकदा वररुचिं व्याकरणसभायाम् आह्वानं कृतवान्। दीर्घसप्ताहं यावद् उभयोर्मध्ये वादानुवादः प्रचलन् आसीत्। ततः परम् अष्टमे दिवसे शिवस्य कृपया महर्षिः पाणिनिः जयं प्राप। फलतः ऐन्द्रव्याकरणं नष्टं जातम्। एवञ्च कात्यायनादयः वर्षशिष्याः मूर्खतां प्रापुः।

अन्ते कात्यायनोऽपि भगवतः शंकरस्य आराधनां कृत्वा, तञ्च सन्तुष्य तत्सकाशात् पाणिनीयसूत्रस्य वार्तिकरचनार्थम् आदेशं प्राप्तवान्। अपि च वर्षेण कार्तिकसकाशाद् व्याडिना इन्द्रदत्तेन च वर्षसकाशात् पाणिनीयव्याकरणं ज्ञातम्। यदा पाणिनिः ज्ञातवान् यत् तस्य सूत्रस्य वार्तिकं कात्यायनेन रचितं तदा स क्रुद्धा कात्यायनाय अभिशापं ददौ यत्- 'भवतः शरीरं नष्टं भवतु' इति। कात्यायनस्य तदा वृद्धावस्था। यदा कात्यायनः पाणिनेः अभिशापं श्रुतवान् तदा कात्यायनोऽपि क्रुद्धा पाणिनये अभिशापं दत्तवान् यत्- 'भगवत्प्रसादादेव अहं वार्तिकरचनायाः आदेशं प्राप्नवं, भवान् एतत् सर्वं न ज्ञात्वैव वृथा मह्यं शापं दत्तवान्, तर्हि भवतोऽपि शिरः विदीर्णं भवतु' इति। फलतः तत्क्षणादेव सिंहेन पाणिनिः हतो जातः। अन्यत्र कात्यायनोऽपि ममार। त्रयोदश्यां तिथौ अनयोः महतोः वैयाकरणयोः मृत्युदिनम् अस्ति इति हेतोः अस्यां तिथौ व्याकरणचर्चा निषिद्धा भवति। पाणिनेः शिष्यः व्याघ्रभूतिः, कात्यायनस्य शिष्यश्च श्रीभूतिः, इमौ द्वौ वार्तिकयुक्तायाः अष्टाध्याय्याः प्रचारम् आरेभाते।

### कृतयः

संस्कृतव्याकरणेतिहासलोडनेन ज्ञायते यद् महर्षिपाणिनिना अधोलिखिताः ग्रन्थाः विरचिताः। ते यथा- (१) अष्टाध्यायीसूत्रपाठः (अध्यायाः ८, पादाः ३२,सूत्राणि प्रायेण ४०००), (२) धातुपाठः (अत्र प्रायेण २००० धातवः परिगणिताः), (३) गणपाठः (अत्र २३२ गणाः सन्ति), (४) उणादिपाठः (पञ्चपादात्मकोणादिप्रकरणे ७४८ सूत्राणि सन्ति), (५)

लिङ्गानुशासनम् (अत्र १८९ सूत्राणि सन्ति), (६) शिक्षा (७) जाम्बवतीविजयमहाकाव्यम्, (८) द्विरूपकोश (९) अष्टाध्याय्याः स्वोपज्ञवृत्तिः। परन्तु अत्र पाणिनिग्रन्थविषये मतभेदः परिदृश्यते। केचन विद्वांसः वदन्ति उणादिपाठस्य प्रवर्तकः शाकटायनः भवति। अस्मिन् प्रसङ्गे महाभाष्ये परोक्षसूचना उपलभ्यते। तेनैव प्रकारेण शिक्षाग्रन्थविषयेऽपि मतभेदो दरीदृश्यते। श्लोकाकारः शिक्षाग्रन्थः पाणिनिना अप्रणीतः इति विषये मतं प्राप्यते। कारणम् अत्र श्लोकात्मकपाणिनीयशिक्षा स्वयं प्रमाणम्। यथा 'अथ शिक्षां प्रवक्ष्यामि पाणिनीयमतं यथा'। अतः पाणिनीयशिक्षासूत्रपाठः पाणिनिप्रणीतः इति विषये विचाराः समुपलभ्यन्ते। पाणिनीयशिक्षासूत्रपाठः अन्यकृतश्लोकात्मकशिक्षापेक्षया सुस्फुटः प्रामाणिकश्च। तैत्तिरीयप्रातिशाख्यस्य त्रिरत्नभाष्यकर्त्रा सोमयाजिना- 'सन्ध्यक्षराणां ह्रस्वा न सन्ति इति पाणिनीयेऽपि' इत्येवं तस्य पाणिन्युपज्ञत्वं समर्थितम्। तथा श्रीयुधिष्ठिरमीमांसकादिभिः ऐतिहासिकैश्च तस्य प्रामाणिकत्वम् उद्घोषितम्। तेनैव प्रकारेण धातुपाठस्य पाणिनीयत्वविषयेऽपि मतभेदः प्राप्यते।

इदानीम् एतेषां ग्रन्थानां विषये आलोचना क्रियते-

**१. अष्टाध्यायी**

अष्टभिः अध्यायैः समन्विता, सूत्रात्मिका च महर्षिणा पाणिनिना विरचिता 'अष्टाध्यायी', इति जगत्प्रसिद्धः संस्कृतव्याकरणग्रन्थः अस्ति। अधुनापि भारते विदेशेषु च भाषाविज्ञानिनां प्रेरणास्थानं वर्तते अयं ग्रन्थः। एवं श्रूयते यत् ताण्डवनृत्यानन्तरं शिवः स्वढक्कां चतुर्दशवारं वादयाञ्चकार। ततः 'अ इ उ ण्' इत्यादीनि चतुर्दश सूत्राणि निर्गतानि। तानि महेश्वरप्रदत्तानि आसन्। अत एव 'महेश्वरादागतानि माहेश्वराणि' माहेश्वरसूत्राणि इति कथ्यन्ते। तेषाम् आधारेण एव पाणिनिः अष्टाध्यायी इति व्याकरणग्रन्थं लिलेख। अयं ग्रन्थः पाणिनेः अमूल्यनिधिः वर्तते। अस्मिन् ग्रन्थे अष्टौ अध्यायाः सन्ति। अत एव 'अष्टाध्यायी' इति नाम्ना प्रसिद्धोऽयं ग्रन्थः। प्रत्येकम् अध्याये चत्वारः पादाः भवन्ति। आहत्य अष्टाध्याय्यां ३२ पादाः सन्ति। प्रत्येकस्मिन् पादे एतावन्ति एव सूत्राणि भवेयुः इति नियमः पाणिनिना नाश्रितः। अष्टाध्याय्यां प्रायः उपचतुस्सहस्रं (प्रायः३९६५) सूत्राणि सन्ति। अष्टाध्याय्यां आदिमं सूत्रं वर्तते 'वृद्धिरादैच्' (अष्टाध्यायी १.१.१) इति। तत्र वृद्धिशब्दं मङ्गलार्थं पाणिनिः आदौ प्रयुक्तवान् अस्ति। अष्टाध्याय्याम् अन्तिमं सूत्रं वर्तते 'अ अ' (अष्टाध्यायी ८.४.६८) इति। तत्र प्रथमाध्याये संज्ञाविधायकानि सूत्राणि सन्ति। द्वितीयाध्याये तावत् समासविधायकानि, एवं कारकसम्बद्धानि सूत्राणि सन्ति। तृतीयाध्याये तावद् विकरणप्रत्ययाः कृत्तिङ्प्रत्ययाः सन्ति। चतुर्थाध्याये स्त्रीप्रत्ययाः तद्धितप्रत्ययाश्च सन्ति। पञ्चमाध्यायस्य आदौ तद्धितप्रत्ययाः अन्ते समासान्ततद्धितप्रत्ययाः सन्ति। षष्ठे अध्याये सन्धिविधायकानि सूत्राणि स्वरविधायकसूत्राणि अलुक्-समासाश्च सन्ति। षष्ठाध्यायस्य चतुर्थपादाद् आरभ्य सप्तमाध्यायसमाप्तिपर्यन्तं अङ्ग-सम्बन्धिकार्याणि सन्ति। अष्टमाध्याये स्वरविधायकानि सन्धिविधायकानि च सूत्राणि सन्ति।

**२. शिक्षा**

अयमपि ग्रन्थः पाणिनिना रचितः वर्तते। श्लोकरूपेण इयम् उपदिष्टा अस्ति। षष्ठी श्लोकाः अत्र राजन्ते। 'अथ शिक्षां प्रवक्ष्यामि' इति क्रमेण आरब्धः अयं ग्रन्थः 'स भवति धनधान्यपशुकीर्तिमान्' इत्यन्तेन फलश्रुतिसहितेन श्लोकेन समाप्यते। वर्णानामुच्चारणं कथं

कर्तव्यमस्ति, वर्णाः कुत्र उत्पद्यन्ते इत्यादिविचाराः अत्र द्रष्टुं शक्याः।

**३. जाम्बवतीविजयम्**

जाम्बवतीविजयम् इति काव्यमपि भगवता पाणिनिनैव लिखितमस्ति। किन्तु काव्यमिदं नोपलभ्यते।

**४. द्विरूपकोषः**

द्विरूपकोषः अपि पाणिनिना एव लिखितः। किन्तु अयं ग्रन्थः पठनपाठने आसीद् न वा इति न ज्ञायते।

**५. धातुपाठः**

पाणिनिना धातुपाठः लिखितो वर्तते। तेन प्रायः द्विसहस्राधिकाः धातवः पठिताः सन्ति। तत्र भ्वादिः अदादिः इत्यादिगणशः धातवः पठिताः सन्ति। प्रत्येकं गणस्य विकरणप्रत्ययः भिद्यते। यथा भ्वादिगणपठितेभ्यः धातुभ्यः शप्, अदादिगणपठितेभ्यः धातुभ्यः लुक्, दिवादिगणेभ्यः श्यन् इत्येवं क्रमेण। धातुपाठे अदृष्टाः किन्तु सूत्रपाठे दृष्टाः धातवः श्रौतधातवः इति पदेन व्यवह्रियन्ते। धातुभ्यः तिङ्कृत्प्रत्ययाः कतृकर्मभावादिषु अर्थेषु भवन्ति।

**६. गणपाठः**

अयमपि पाठः पाणिनिना एव कृतः वर्तते। पाणिनिना आदौ गणपाठः कृतः, ततः सूत्रपाठः। गणपाठं कृत्वा तत्र गणे पठितेभ्यः शब्देभ्यः सूत्रेण तदनन्तरं कार्यं विहितम्। यथा 'सर्व विश्व उभ', इत्यादिशब्दान् 'सर्वादीनि सर्वनामानि' इति गणे पठित्वा 'सर्वादीनि सर्वनामानि' (अष्टाध्यायी १.१.२७) इति सूत्रेण तद्गणपठितानां शब्दानां सर्वनामसंज्ञा विहिता।

**७. उणादिसूत्राणि**

उणादिसूत्रप्रतिपादकग्रन्थः पाणिनेः एव इत्यत्र सन्देहः इतोऽपि वर्तते वैयाकरणेषु। केचन एवं कथयन्ति उणादिसूत्राणि शाकटायनस्य इति। शाकटायनस्यैव उणादिग्रन्थः इति बहुभिः वैयाकरणैः स्वीक्रियते। अत्र धातुभ्यः प्रत्ययाः विहिताः सन्ति। लोके प्रसिद्धाः शब्दाः अनेन सूत्रेण निष्पन्नाः। यथा ययीः, पपीः, सूर्यः, रात्रिः, लक्ष्मीः इत्यादिशब्दाः।

**८. लिङ्गानुशासनम्**

लिङ्गानुशासनमपि पाणिनिकृतमेव वर्तते। अथ लिङ्गानुशासनमिति अयं ग्रन्थः आरभ्यते। स्त्र्यधिकारः, पुंल्लिङ्गाधिकारः, नपुंसकलिङ्गाधिकारः, स्त्रीपुंसाधिकारः, पुंनपुंसकाधिकारः इत्येते पञ्च अधिकाराः सन्ति। एकस्मिन्नेव लिङ्गे विद्यमानाः शब्दाः, द्वयोः लिङ्गयोः विद्यमानाः शब्दाः, त्रिषु लिङ्गेषु विद्यमानाः शब्दाश्च पृथक्कृत्य पठिताः सन्ति। अत एव एतद् अस्ति अस्य लिङ्गानुशासनस्य वैशिष्ट्यम्।

**९. अष्टाध्याय्याः स्वोपज्ञवृत्तिः**

अयमपि ग्रन्थः पाणिनिना एव लिखितः वर्तते। अयं ग्रन्थः वृत्तिग्रन्थे अन्तर्भवति। येन क्रमेण सूत्राणि लिखितानि सन्ति तत्क्रमेणैव तेषां सूत्राणाम् अर्थः (वृत्तिः) अत्र ग्रन्थे उपलभ्यते इति प्रकृतग्रन्थस्य वैशिष्ट्यम्।

# भारतस्य भवितव्यम्†

स्वामी जपसिद्धानन्दः*

इयं सा सनातनभूमिः यां ज्ञानम् आदौ देशान्तरसङ्क्रमणात् प्राक् स्वनिवासम् अकृत।[१] इदं तद् भारतं यस्य वहन्नदीभिः सागरोपमाभिः अध्यात्मभाव-प्रवाहः अधिभौतम् आपादितः इव, यत्र चिरन्तनः हिमालयः स्तरम् अनुस्तरम् उत्क्रामन् हिममकुटैः दिवो रहस्यान्यपि ईक्षते इव। इदं तदेव भारतं यस्य मृत्तिका ऋषीणाम् अनुत्तमानां पादैः संक्रान्ता। अत्रादौ समजनि जिज्ञासा पुरुषस्वरूपे प्रत्यक्-प्रपञ्चे च। इह प्रथमं समुदिताः सिद्धान्ताः आत्मनः अमरत्वस्य, निरीक्षकभगवतः सत्तायाः, प्रकृतिपुरुषयोः अन्तर्यामिणः देवस्य च। इह पराकाष्ठां प्रापुः उच्चतमानि लक्ष्याणि धर्मस्य च दर्शनस्य च। सोऽयं देशः यस्मात् महोर्मयः इव रंहसा निर्गम्य अध्यात्मभावः दर्शनं च पौनःपुन्येन अवनीतलम् आप्लावयामासतुः। स एवायं देशः यतः पुनरपि तादृशाः तरङ्गाः निष्क्रामेयुः[२] मनुकुलस्य जीर्यज्जनेषु प्राणं तेजश्च आदधानाः। इदं तदेव भारतं यद् असहत बहूनां शतकानाम् आघातम्, शतशः आक्रमणं परेषाम्, तुमुलोद्रेकं च रीतिचर्याणाम्। इयं सैव भूमिः या जगत्यां यावच्छैलान्तरात् द्रढीयसी तिष्ठति अमरेण ऊर्जसा, अनाश्येन ओजसा च। तस्य जीवितम् आत्मतुल्यस्वभावम् अनादि, अनन्तम्, अमरम्। वयं च सुताः तदृश्याः भुवः।

हे भारतात्मजाः, अहमद्य क्रियान्वयि किञ्चिद् भवतः भाषितुम् इहोपस्थितः। अस्मदीयं पुरावैभवं भवतः स्मारयतो मम विद्यते अयं हेतुः - “अतीतस्य चिन्तनम् अवकर्षति, अकिञ्चित्करं च। अतः भाविनि दत्तदृष्टिना भाव्यम्” इति बहु वारम् उदितोऽस्मि। तत् सत्यम्। किन्तु भूताद् विसृज्यते भविष्यत्। अवलोकयत अतः अतीतं यावच्छक्ति सुदूरम्। आकण्ठं पिबत प्राग्भ्यः सनातनस्रोतोभ्यः। ततः परं पश्यत पुरस्ताद्, क्राम्यत[३] अग्रे, विधत्त भारतं भास्वरतरं महत्तरम् उदग्रतरं च अभूतपूर्वविधया। अस्मत्पूर्वजाः बभूवुः महात्मानः। प्रथमं तत् स्मरणीयम् अस्माभिः। शिक्षामहै सत्तामूलम् अस्माकं यद् रक्तं वहति अस्मन्नाडीषु। श्रद्दधीमहि तन्मूले तत्कृतप्रभावे च। ततः श्रद्धायाः, व्यतीतमहिमज्ञानाच्च विदधीमहि भाविभारतं पूर्वापेक्षया महत्तरम्। आसन् कालावधयः यत्र अपचयः अवनतिश्च बभूवतुः। नाहम् अधिकं प्राशस्त्यम् अनुबध्नामि तेषु, वयं सर्वे तान् जानीमः। अमी कालावधयः तत्तत्प्रयोजकाः अभूवन्।

विशालः वृक्षः सूते रुचिरं पक्वं फलम्। कालेन तत् फलं निपतति भूमौ, शीर्यते, पूयते च।

† नवयुगाचार्याणां श्रीमद्विवेकानन्द-स्वामिचरणानां “The Future of India” इति भाषणस्य संस्कृत-भावानुवादः। तच्च भाषणं पश्चिमदेशेभ्यः प्रत्यागतैः तैः चेन्नैनगरे विहितम् आसीत् १८९७ क्रिस्ताब्दे।

* संयोजकः तथा विभागाध्यक्षचरः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।

१ “any” left out to keep the diction simple and readable

२ क्रमः परस्मैपदेषु (७.३.७६ / २३२२) इति क्रमो दीर्घः परस्मैपदे शिति।

३ “वा भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः” (अष्टा.३.१.७०) इति श्यन् वा स्यात् कर्त्रर्थे सार्वधातुके परे।

उत्सन्नात् तस्माद् उद्गच्छति मूलं भावि-पादपश्च। स्यादयं महीयान् मूलमहीरुहात्। योऽयम् अवसादनावधिः अस्माभिः अतिक्रान्तः स नितराम् अपेक्षितः आसीद्। अवसादाद् अस्माद् आविर्भवद् अस्ति भविष्यद् भारतम्, सम्भवदङ्कुरम्, यस्य प्रथमपत्राणि सम्प्रति निर्गतपूर्वाणि। सुविपुलः स महाविटपी ऊर्ध्वमूलः इह नयनपथम् आरोढुं प्रवृत्तः। तेन सम्बद्धम् एव अहं भवतः विवक्षुः अस्मि।

देशान्तरेषु ये सङ्कटाः तदपेक्षया भारते संबाधाः जटिलतराः गुरुतरप्रभावाश्च। वंशः, धर्मः, भाषा, शासनम् इत्येतत्सर्वं सम्मिलितं सत् निर्वर्तयति राष्ट्रम्। अभिजनम् अभिजनम् अनु परिशीलनेन प्रतीयते यत् लोकेऽस्मिन् राष्ट्रस्य घटकानि तत्त्वानि कतिपयान्येव भवन्ति, ऋते भारतवर्षाद् यस्य घटकाः भवन्ति बहवः। अत्र आर्याः, द्राविडाः, टार्टर्-जनाः, तुर्कदेशीयाः, मोघल-जनाः, युरोपाभिजनाः सर्वे स्वं स्वं जीवसारं अस्मिन् देशे जुह्वत इव बभूवुः। भाषाणां च मनोज्ञतमः सङ्गमः विलसति अत्र। आचाराणां परम्पराणां च अत्रैव विपर्ययः अधिकतरः - न तावन् व्यत्ययः युरोप-पौरस्त्ययोः मध्ये, यावद् भारतीययोरेव अवान्तरजात्योः स्यात्।



*dīpaśikhā*/v7/2024/Swami Japasiddhananda/pp. 32-33

# स्वामिसारदानन्दकृतः श्रीश्रीरामकृष्णलीलाप्रसङ्गः

अनुवादकौ– डॉ. राकेशदाशः*, शान्तनुनायेकः†

## प्रथमः खण्डः– द्वितीयः अध्यायः (कामारपुकुरम् पितृपरिचयश्च)

### कामारपुष्करप्रदेशस्य पूर्वसमृद्धिः वर्तमानस्थितिश्च

१८६७ ख्रीष्टाब्दे मलेरियारोगजनितायाः महामार्याः उद्भवात् पूर्वं कृषिप्रधानस्य वङ्गप्रदेशस्य सर्वेषु पल्लीग्रामेषु या अपूर्वा शान्तिः विद्यते स्म सा अनिर्वचनीया। विशेषतः हुगलीमण्डलान्तर्गते अस्मिन् ग्रामप्रदेशे विद्यमानस्य सर्वस्य विस्तीर्णधान्यप्रान्तरस्य मध्ये विराजमानाः लघुग्रामाः बृहति हरितसमुद्रे भासमानाः द्वीपाः इव प्रतीयन्ते स्म। भूमेः उर्वरतायाः खाद्यद्रव्यस्य अनभावत्वात् निर्मलवायौ नित्यपरिश्रमकारणाच्च ग्रामवासिनः देहे स्वास्थ्यसबलते मनसि प्रीतिसन्तोषौ च सदा परिलक्ष्यन्ते स्म। येषु ग्रामेषु जनानाम् आधिक्यं वर्तते तेषु सर्वेषु ग्रामेषु कृषिकार्यातिरिक्ते लघुलघुशिल्पकार्ये अपि जनाः नियुक्ताः आसन्। तद्रूपेण कुण्डलिका-मधुरादीनां प्रस्तुतीकरणात् कामारपुष्करं चिरं प्रसिद्धिं गतम्। अपि च आबलूसदारुनिर्मितहुक्कायन्त्रनलिकानिर्माणेन एषः ग्रामः कलिकातानगरेण सह व्यवसायेन अद्यापि किञ्चिद् धनम् अर्जयति। सूत्र-गात्रमार्जनी-वस्त्रादिनिर्माणेन किञ्च अन्येन विभिन्नेन शिल्पकार्येणापि कामारपुष्करं प्रसिद्धिं गतम्। विष्णु-चापडिप्रभृतयः केचन प्रथितयशसः वस्त्रव्यवसायिनः अस्मिन् ग्रामे उषित्वा तदा कलिकातया सह बहुधनानां व्यवसायं कुर्वन्ति स्म। इदानीमपि ग्रामे प्रतिशनिमङ्गलवासरं हट्टः भवति। ताराहाट-वदनगञ्ज-सिहड-देशडाप्रभृतिभ्यः पार्श्वस्थेभ्यः ग्रामेभ्यः जनाः सूत्रं, वस्त्रं, गात्रमार्जनी, हण्डिका, कलसः, शूर्पः, वर्तुलाकारशूर्पः, कटः इत्यादि सांसारिकं नित्यव्यावहारिकं पण्यं क्षेत्रजं च सर्वं द्रव्यं हट्टदिवसे कामारपुष्करम् आनयन्ति, क्रयविक्रयादिकं च कुर्वन्ति। ग्रामे आनन्दोत्सवस्य अभावः इदानीमपि न परिलक्ष्यते। चैत्रमासि मनसापूजा शिवस्य गाजनाख्ये उत्सवे, अपि च वैशाखे ज्यैष्ठे वा चतुर्विंशतिप्रहरीय-हरिवासरे कामारपुष्करं प्रसन्नं भवति। तद्विहाय भूस्वामिगृहे द्वादशमासं यावत् सर्वविधः उत्सवः, किञ्च प्रतिष्ठितेषु सर्वेषु देवालयेषु नित्यपूजा उत्सवादि च अनुष्ठीयेते। वस्तुतः दारिद्र्यवशात् वर्तमानकाले तेषु बहूनां लोपः जातः।

### तस्मिन् प्रदेशे धर्मठाकुरस्य पूजा

धर्मठाकुरस्य पूजायाम् अपि अत्र एकदा विशेष आडम्बर आसीत्। किन्तु इदानीम् सः कालः नास्ति, बौद्धत्रिरत्ने अन्यतमः श्रीधर्मः अधुना कुर्ममूर्तिरूपेण परिणम्य अत्र पार्श्वस्थेषु सर्वेषु ग्रामेषु च पूजामात्रम् एव प्राप्नोति। ब्राह्मणा अपि समयानुसारेण मूर्तिपूजां कुर्वन्ति इति

* विभागाध्यक्षः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।
† शोधच्छात्रः, संस्कृतदर्शनविभागस्य, रामकृष्णमिशन्-विवेकानन्दशैक्षणिकशोधसंस्थानस्य, बेलुडमठस्य।


*dīpaśikhā*/v7/2024/Dr. Rakesh Das, Santanu Nayek/pp. 34-36

द्रष्टुं शक्यते। उक्तस्य धर्मठाकुरस्य भिन्नं भिन्नं नाम ग्रामान्तरेषु श्रूयते। यथा– कामारपुष्करस्थस्य धर्मठाकुरस्य नाम— 'राजाधिराजः धर्मः' इति। श्रीपुरे प्रतिष्ठितस्य उक्तस्य ठाकुरस्य नाम— 'यात्रासिद्धिरायः धर्मः' इति। एवमेव मुकुन्दपुरस्य समीपे मधुवाटी इत्याख्ये ग्रामे प्रतिष्ठितस्य धर्मस्य नाम— 'सन्न्यासीरायः धर्मः' इति। कामारपुष्करस्थस्य प्रतिष्ठितस्य धर्मस्य रथयात्रापि एकदा महासमारोहरूपेण सम्पन्ना भवति स्म। नवचूडासमन्वितः सुदीर्घः रथः तदा तस्य मन्दिरपार्श्वे सदा नयनगोचरीभवति स्म। रथभग्नानन्तरं सः रथः पुनः न निर्मितः। धर्ममन्दिरम् अपि संस्काराभावात् धूलिसात् भवति इति दृष्ट्वा धर्मपण्डितः यज्ञेश्वरः तस्य स्वगृहे ठाकुरस्य स्थापनम् अकरोत्।

## हालदारपुष्करिणी, भूतिर् खाल्, आम्रकाननम् इत्यादीनां कथा

ब्राह्मणः, कायस्थः, तन्तुवायः, सद्गोपः, लोहकारः, कुम्भकारः, धीवरः, चण्डालः इत्यादीनाम् उच्चनीचानां सर्वेषाम् एव कूलानां वसतिः आसीत् कामारपुष्करे। ग्रामे तिसृचतस्रः बृहत्यः पुष्करिण्यः सन्ति। तासु हालदारपुष्करिणी एव सर्वापेक्षया बृहती। एतद्भिन्नाः लघुपुष्करिण्यः अपि बह्व्यः सन्ति। तासां मध्ये पुनः काश्चन शतदलपद्म-कुमुद-कह्लारश्रेणीः उरसि धृत्वा अपूर्वां शोभां विस्तारयन्ति। ग्रामे इष्टिकानिर्मितगृहस्य समाधिस्थलस्य च असद्भावः नास्ति। पूर्वं तेषां संख्या बह्वधिका आसीत्। रामानन्द-शाँखारिणः भग्ना भित्तिका, फकिर-दत्तस्य जीर्णः रासमञ्चः, वनाकीर्णः इष्टिकास्तूपः परित्यक्तदेवालयाः च इत्यादिषु नैकेषु स्थानेषु विद्यमानाः सन्तः तद्विषयस्य, अपि च ग्रामः पूर्वं समृद्धः आसीत् इति विषयस्य च परिचयं प्रददाति। ग्रामस्य ईशानदिशि वायुदिशि च 'बुधुइ मोडल्', 'भूतीर् खाल्' इति नामके द्वे श्मशाने विद्यमाने स्तः। अन्तिमोक्तस्य स्थानस्य प्रतीच्यां गोचर-प्रान्तः, मानिकराजप्रतिष्ठितं सर्वसाधारणानाम् उपभोग्यम् आम्रकाननम् आमोदरनदश्च विद्यमाने वर्तेते। भूतिर् खाल् इति दक्षिणस्यां प्रवहत् अनतिदूरम् उक्तेन नदेन सह सममिलत्।

## भूरसुवो-ग्रामस्य मानिकराजा

कामारपुष्कराद् उत्तरस्यां क्रोशार्धे भूरसुवो ग्रामः। श्रीयुक्तः मानिकचन्द्र-वन्द्योपाध्यायः इत्याख्यस्य एकस्य धनाढ्यव्यक्तेः तत्र वासः आसीत्। चतुष्पार्श्वस्थेषु सर्वेषु ग्रामेषु एषः 'मानिकराजा' इति नाम्ना परिचितः आसीत्। पूर्वोक्तम् आम्रकाननम् अतिरिच्य सुखसायेर हातिसायेर इत्यादयः बृहत्यः सर्वाः दीर्घिकाः इदानीम् अपि अस्य कीर्तिम् उद्घोषयन्ति। श्रूयते, अस्य गृहे लक्षाधिकाः ब्राह्मणाः बहुवारं आमन्त्रिताः सन्तः भोजनं कृतवन्तः।

## गडमान्दारणम्

कामारपुष्करं दक्षिणपूर्वेण (आग्नेयदिशि) मान्दारणग्रामः। चतुष्पार्श्वस्थान् सर्वान् ग्रामान् अरेः आक्रमणाद् रक्षयितुं पूर्वं कदाचिद् अत्र दुर्भेद्यः एकः दुर्गः प्रतिष्ठितः आसीत्। पार्श्ववर्तिनः लघुकायस्य आमोदरनदस्य गतिं कौशलेन परिवर्त्य उक्तस्य दुर्गस्य परिखारूपेण परिवर्तितवन्तः।

## उचालनस्य दीर्घिका मोगलमारेः युद्धक्षेत्रं च

मान्दारणदुर्गस्य भग्नतोरणं स्तूपः परिखा च, अपि च तस्य अनतिदूरं शैलेश्वरमहादेवस्य मन्दिरम् इदानीम् अपि विद्यमानं सत् पाठानादीनां भूशासनकाले एतेषां स्थानानां प्रसिद्धेः परिचयं प्रददाति। दुर्गमान्दारणस्य पार्श्वाद् वर्धमानं प्रति गमनागमनाय पूर्वोक्तः मार्गः गतः। तस्य पथः उभयस्मिन् पार्श्वे बह्व्यः दीर्घिकाः नयनगोचरीभवन्ति। उक्ताद् दुर्गात् प्रायः नवक्रोशाद् उत्तरस्यां दिशि स्थिता उचालनाख्यस्थानस्य दीर्घिका एव तासु सर्वासु बृहती वर्तते। उक्तस्य पथः एकस्मिन् स्थाने एका भग्ना हस्तिशालापि परिलक्षिता भवति। एतेषां सर्वेषां दर्शनेन अवगम्यते यत्, युद्धविग्रहादीनां सौकर्याय एव एते पन्थानः निर्मिताः इति। मोगलमारेः प्रसिद्धं युद्धक्षेत्रं पथि विद्यमानं सत् तद्विषयस्य प्रमाणं प्रददाति।

दीपशिखा

# स्वामिगम्भीरानन्देन विरचितं स्वामिब्रह्मानन्दचरितम्

## पूर्वाङ्काद् अनुवर्तते...

### ब्रह्मचारिणा मनोमयेन* अनूदितम्

ठाकुरः अवगतवान् आसीद् यत्, तस्य मानसपुत्रः साक्षाद् व्रजवासी राखालः। सः "गोपाल गोपाल" इति सम्बोधनेन स्वहस्तेन तं भोजयति स्म, इतोऽपि नानाभावावलम्बनेन कथं तं स्नेहयति स्म तद् दर्शनयोग्यम् आसीत्। इतरजनानां त्रुटिविच्युतिं दृष्ट्वा ठाकुरः तान् भर्त्सयति स्म। किन्तु राखालस्य दौर्व्रत्ये अविचलितः सन् आनन्दम् अनुभवति स्म। एकस्मिन् दिवसे भोजनात् परं ठाकुरः अवदत् 'रे राखाल, ताम्बुलं निर्माहि, ताम्बुलं नास्ति खलु'। मानसपुत्रः उत्तरं दत्तवान् 'ताम्बुलनिर्माणं न जानामि'। 'किं कथयसि ताम्बुलनिर्माणे पुनः अधिकज्ञानस्य किं प्रयोजनं, गच्छ, ताम्बुलं निर्माय आनय'। 'न शक्नोमि महोदय' इति उत्तरं श्रुत्वा ठाकुरः हसन् आकुलीभवति स्म। एवं सरलव्यवहारं दृष्ट्वा ठाकुरः अवगतवान् यत् राखालः यथार्थरूपेण एव तं स्वात्मीयरूपेण एकान्ततया गृहीतवान्- तस्य व्यवहारे कथञ्चित् अपि कृत्रिमता न विद्यते, अस्ति केवलं स्नेहसंभूतप्रेम। परन्तु एवं क्षेत्रविशेषे तस्य व्यवहारेण ठाकुरस्य कौतुकं वर्धितं भवति चेदपि राखालः सर्वदा भर्त्सनातीतः आसीत् इति न। एकस्मिन् दिवसे कालीमन्दिरात् नवनीतम् आगतम्। राखालः क्षुधार्तः आसीत्, तस्मात् अनुमत्याः अपेक्षां विनैव नवनीतस्य खण्डं गृहीत्वा मुखे स्थापितवान्। ठाकुरः तत्क्षणम् एव सक्रोधेन अवदत् 'त्वं तु अतिलोभी असि। अत्र आगत्य लोभत्यागार्थं प्रयतेथाः, तद्विहाय स्वयं नीत्वा कथं खादसि'। लज्जया राखालस्य वदनं रक्तवर्णीयं जातम्। अपरे एकस्मिन् दिने एकां मुद्रां दृष्ट्वा राखालः संगृहीतवान्- तस्य इच्छा यत् कस्मैचित् भिक्षुकाय अन्धाय खञ्जाय वा दास्यति इति। सः ठाकुरं कृतकर्मसमूहं सरलविश्वासेन वदति स्म। तस्माद् इमां वार्ताम् अपि निवेदितवान्। परन्तु ठाकुरः श्रुत्वैव भर्त्सयन् आह 'यः मत्स्यं न खादति, सः कथं मत्स्यविपणीं वा गच्छेत्। यदि तव स्वप्रयोजनं किमपि नास्ति, तर्हि किमर्थं मुद्राम् इमां स्वीकृतवान् असि'।

ठाकुरः स्वयं विशेषपरिस्थितौ भर्त्सनादिकं करोति चेदपि, अपरः कश्चित् राखालं कटुकथां वदिष्यति, इत्येतत् ठाकुरस्य असहनीयं भवति स्म। मानसपुत्रम् अन्यः कश्चित् भर्त्सयति चेत् स्नेहविगलितकण्ठेन वदति स्म 'राखालस्य दोषग्रहणं न कर्तव्यं, तस्य गलमर्दनेन दुग्धं बहिः आगच्छति' इति। पुनः कश्चित् कार्यार्थम् आदिशति चेत् वदति स्म 'अहो! सः बालस्वभावः अस्ति, तं यूयं कार्यकरणार्थं न वदथ, तस्य स्वभावः अतिकोमलः' इति।

ठाकुरस्य सङ्गलाभेन राखालः साधुजनोचितं सदाचारम् अपि अवगतवान्। एकदा कस्यचिद् अनुरागिणः गृहं निमन्त्रितः सन् ठाकुरः प्रियपुत्रेण सार्धं तत्र गतवान्। तत्र भजनादिसमापनानन्तरम् आहारादिकं प्रस्तुतम्। गृहकर्ता स्वपरिजनानां परिचर्यार्थं लग्नः सन् ठाकुरस्य विषये विस्मृतवान् इति विलोक्य ठाकुरः सहासं राखालम् अवदत्- 'किं भोः,

* बेलुडमठे रामकृष्णसङ्घस्य ब्रह्मचारी।



*dīpaśikhā*/v7/2024/Brahmachari Manamoy/pp. 37-39

कोऽपि न आह्वयति खलु'। एवं व्यवहारेण सम्भ्रान्तवंशसम्भूतः राखालः स्वावमाननम् अनुभूय साभिमानम् उक्तवान् 'महाशय आगच्छतु'। ठाकुरः तु मानापमानयोः समभावापन्नः, स हसन् आह- 'अरे तिष्ठ, यानभाटकं द्व्यानकत्रिरूप्यकं कः दास्यति, सर्वदा अभिमानः न कर्तव्यः, रूप्यकं नास्ति पुनः शुष्काभिमानः। पुनः एतादृश्यां गभीरायां रात्रौ भोजनं कुत्र कुर्मः?' गत्यन्तरविरहाद् राखालः तूष्णीम् उपविष्टवान्। क्षणानन्तरम् आहारार्थम् आह्वाने आगते परिलक्षितं यत् भोजनालयः पूर्वतः एव परिपूर्णः अस्ति, अतः अतिकष्टेन एकस्मिन् अपरिष्कृते स्थाने ठाकुरम् उपवेशयति स्म। आहारात् परं दक्षिणेश्वरं प्रत्यागमनकाले मार्गे सः राखालं बोधयन् उक्तवान् यत् 'गृहिणः अज्ञानवशवर्तिनः सन्तः बहुधा साधुजनैः साकं यथोचितं सत्कारादिकं कर्तुं न शक्नुवन्ति। तथापि साधवः तेषां दोषादिकम् अविगणय्य केवलं तेषां कल्याणम् एव चिन्तयेयुः। किमपि अभुक्त्वा प्रत्यागमने सति गृहिणाम् अकल्याणं भवति- साधुभिः तथा न कार्यं, न्युनातिन्यूनं चषकपरिमितं जलं वा याचित्वा पिबेयुः'।

तस्मिन् काले तत्र समागतः भक्तगणः ध्यानजपादिषु रतः भवति स्म, किञ्च स्वानुभूतिं ठाकुरं श्रावयति स्म। श्रुत्वा श्रुत्वा राखालस्य आग्रहः जातः, तस्यापि तथा अनुभूतिः भवेत्। एकस्मिन् अहनि ठाकुरस्य अङ्गे तैलमर्दनं कुर्वन् विषयम् इमम् उपस्थापितवान्, किञ्च ठाकुरस्य असम्मतिं ज्ञात्वा पुनः पुनः अनुरोधम् अकरोत्। ठाकुरः तदा तस्य अवाञ्छिताग्रहस्य निवृत्यर्थं दुःसहं वाक्यम् एकम् एवम् उक्तवान् येन राखालः तत्क्षणमेव दक्षिणेश्वरं त्यक्तुम् उद्यतः। किन्तु उद्यानद्वारमस्य अतिक्रमणानन्तरं तस्य पादद्वयं जडीभूतं— सः मौनविस्मयाविष्टः उपविष्टवान्। एतस्मिन् अवसरे ठाकुरसकाशात् रामलालाग्रजः आगत्य तम् आहुतवान्, अतः गत्यन्तराभावात् सः प्रत्यागतः। ठाकुरः तदा सकौतुकम् उक्तवान्- 'किं भोः, सीमाम् अतिक्रमितुं शक्तवान् वा?' तस्मिन् दिवसे अपराह्णे पुनः सान्त्वनां विधाय उक्तवान्- 'उत त्वम् अक्रुद्ध्यः? किमर्थं तव क्रोधं जनितवान्, अस्य रहस्यम् अस्ति। औषधं समीचीनतया कार्यं कुर्यात् इत्यतः। प्लिहरोगस्य वर्धने सत्येव मनसादीनि पत्राणि दातव्यानि'। पुनः एकदा राखालः दक्षिणेश्वराद् गन्तुम् उद्यतः आसीत्। विषयम् इमम् उल्लिख्य ठाकुरः अधरसेनमहोदयस्य गृहे तम् उक्तवान्- 'अत्र श्रावणमासस्य जलं न वर्तते, श्रावणमासे जलं यथा वेगेन आगच्छति पुनः तथा बहिर्गच्छति अपि। अत्रत्यं शिवलिङ्गः पातालाद् उत्थितं, न तु उप्तम्, त्वं दक्षिणेश्वरात् क्रोधवशाद् आगतवान्, अहं मातरं निवेदितवान् यत्- मातः अस्य अपराधं न स्वीकुरु' इति।

केभ्यश्चित् दिनेभ्यः परमेव दक्षिणेश्वरे ठाकुरस्य पदसेवां कुर्वन् राखालः आध्यात्मिकराज्यं प्रविशन् बाह्यसञ्ज्ञया हीनवान्। अनन्तरं ठाकुरः स्थानमिदं भक्तान् दर्शयन् उवाच- 'अत्र उपविश्य पदं मर्दयतः राखालस्य प्रथमः भावः अभवत्। कश्चित् एकः भागवतपण्डितः अस्यां कक्षायाम् उपविश्य भागवतस्य कथां वदति स्म। कथादिकं श्रुत्वा राखालः रोमाञ्चितः भवति स्म-ततः स्थिरः अभूत्'।

ठाकुरस्य कृपया बहुधा प्रार्थितालौकिकानुभूतिसम्पन्नः सन्नपि राखालस्य मनसि एका अतृप्तिः अतिष्ठत्। सः काङ्क्षितवान् यत् इच्छामात्रेण भगवद्भावे निमज्जितः सन् विभिन्नदर्शनादिना कालम् अतिवाहयिष्यति। अपरेषाम् एवं भवति, तस्य किमर्थं न भवेत्? अतः एकस्मिन् दिवसे ठाकुरम् अवोचत्- 'भोः महोदय, कथं मम अन्यजनानामिव दर्शनादिकं

न भवति?' इति। ठाकुरः अवदत्- 'नियमितरूपेण जपध्यानादिकं क्रियते चेत् एवं दर्शनादिकं भवति'। तस्य अनुज्ञया राखालः साधनार्थं प्रवृत्तः अभूत्। किन्तु प्रथमतः तस्मात् रसबोधः न जायते स्म, इत्यतः साधनप्रवाहे शैथिल्यम् आगतम्। इदं दृष्ट्वा ठाकुरः उक्तवान्- 'दृढं धैर्यं स्यात्- तेनैव साधनादिकं भविष्यति।' अतःपरम् एकस्मिन् दिने साधकः राखालः ठाकुरेण साकं कालीमन्दिरम् अगच्छत्। गर्भमन्दिरे ठाकुरे उपविष्टे सति सः नाट्यमन्दिरे उपविश्य जपं कुर्वन् दृष्टवान् यद् अकस्माद् गर्भमन्दिरम् अलौकिकेन ज्योतिषा उद्भासितम् अभूत् किञ्च क्रमेण सः देदीप्यमानः स्निग्धज्योतिःपुञ्जः मन्दिरद्वारम् अतिक्रम्य तं प्रति आगच्छति। भयेन चकितः राखालः तत्क्षणमेव आसनं परित्यज्य द्रुतपादविक्षेपेण ठाकुरस्य कक्षां प्रत्यागतवान्। ठाकुरः स्वकक्षां प्रत्यागत्य संपूर्णां घटनां श्रुत्वा अवदत्- 'त्वं वदसि खलु, तव दर्शनादिकं किमपि न भवति, पुनः किमपि पश्यसि चेदपि पलायनं करोषि, तर्हि किं करिष्यसि तद् वद'। पुनः एकदा राखालः नाट्यमन्दिरे ध्यानमग्नः आसीत्, तस्मिन् समये ठाकुरः तत्र आगत्य उक्तवान्- 'मन्त्रम् इमं त्वं गृहाण, किञ्च पश्य तत् तव इष्टमूर्तिम्'। राखालः सत्यमेव तस्मिन् क्षणे मन्त्रं प्राप्य इष्टमूर्तिञ्च वीक्ष्य आनन्दरसागरे भासमानः आसीत्। अन्यस्मिन् दिने सः बहुचेष्टया मनः स्थिरीकर्तुम् अशक्तः सन् विषण्णचित्तेन स्वादृष्टकारणात् स्वं धिक्कुर्वन् आसनं त्यक्तवान्। तस्मिन् क्षणे एव तत्र ठाकुरः आगत्य अकस्माद् आसनत्यागस्य कारणम् अपृच्छत्, किञ्च सर्वं श्रुत्वा मन्दं किमपि उच्चारयन् राखालस्य जिह्वायां तिस्रः रेखाः व्यलिखत्- मुहूर्तेन राखालस्य अन्तः शान्तेः निरन्तरप्रवाहः प्रावहत्।

# ब्रह्मानन्दस्वामिना सङ्कलितः श्रीश्रीरामकृष्णोपदेशः

## ब्रह्मचारिणा शुभदीपेन† अनूदितः

### विषयः - जीवस्य अवस्थाभेदः

१. मनुष्यः— यथा उपाधानानाम् आवरणम्; तेषां बहिर्भागे केचन वर्णेन रक्ताः, केचन कृष्णाः; परन्तु अन्तः सर्वेषां कार्पासः समान एव। केचन जनाः सुन्दराः दृश्यन्ते; केचन कृष्णवर्णीयाः सन्ति; केचन साधवः, केचन असाधवः; किन्तु स एकः एव ईश्वरः सर्वेषु विराजते।

२. संसारे जनानां स्वभावः द्विविधः इति परिलक्ष्यते— केचित् स्वभावतः शूर्पसदृशा अपरे केचन चालनीसदृशाः । यथा शूर्पः कूर्चादिकं सर्वं निष्प्रयोजनं त्यक्त्वा, धान्यादिकं सारभूतम् अंशं च स्वस्य अन्तः धारयति। तथा केचन जनाः संसारस्य साररहितानि वस्तूनि (कामकाञ्चनादीनि) सर्वाणि परत्यज्य, जगतः सारभूतं भगवन्तम् एव स्वीकुर्वन्ति। यथा चालनी सर्ववस्तूनि परित्यज्य निरर्थकवस्तूनि स्वयमेव धारयति। तथा जगति केचन जनाः सारभूतम् ईश्वरं त्यक्त्वा, कामकाञ्चनादि-निरर्थकवस्तूनि गृह्णन्ति ।

३. विषयजनानां मनः शकृत्कीटवत् भवति। गोमयोत्थाः कीटाः गोमयस्य अन्तः वसितुम् इच्छन्ति। यदि तान् गोमयात् परं किमपि ददति, तर्हि तेभ्यः न रोचते। यदि बलपूर्वकं तान् कमलस्य अन्तः उपावेश्यते तर्हि ते म्रियन्ते। विषयासक्तजनानां मनः तथैव। विषयकथां विना अन्यत् किमपि न रोचते। यदि कुत्रचिद् ईश्वरीयवार्ताः प्रवृत्ताः सन्ति, तर्हि ते तत्स्थानं परित्यज्य यत्र जल्पनं भवति तत्र गत्वा तिष्ठन्ति।

४. यथा— केचन मत्स्याः जाले गृहीताः पलायितुं न प्रयतन्ते, ते तत्रैव तिष्ठन्ति; पुनः केचन मत्स्याः पलायनार्थं प्लवन्ति, परन्तु पलायितुं न शक्नुवन्ति। पुनः मत्स्यस्य अपरप्रकारः वर्तते, ये जालं छित्वा पलायन्ते। तथा संसारेऽस्मिन् त्रिविधाः जीवाः सन्ति; यथा— बद्धः, मुमुक्षुः मुक्तश्च।

५. मार्गे गच्छन्ती रात्रौ भवति सति आकाशे वात्यालक्षणस्य प्रादुर्भावाद् एका धीवरी मालिगृहे आश्रयं स्वीकृतवती। माली पुष्पगृहे आश्रयं प्रदाय यथाशक्ति सेवां कृतवान्। परन्तु केनापि प्रकारेण तस्याः निद्रा न अभवत्। अन्ते सा अवगच्छति यत्, उद्याने विविधानि पुष्पाणि प्रफुल्लितानि सन्ति, तथा च तेषां पुष्पाणां गन्धात् तस्याः निद्रा न भवति। तदा सा मत्स्यकण्डोले जलं सित्त्वा शिरःसमीपे स्थापयित्वा अस्वपत्। धीवर्याः इव विषयगतजीवेभ्यः अपि जगति दुर्गन्धं विना न किमपि रोचते।

६. यथा शिशुकपोतस्य कण्ठे हस्तः स्थाप्यते चेत् चणकाः गजगजायन्ते। तथा बद्धजीवेन सह सम्भाषणं क्रियते चेत्, तेषाम् अन्तः वर्धमानायाः वासनायाः अनुभवः भवति । तेभ्यः

† बेलुडमठे रामकृष्णसङ्घस्य ब्रह्मचारी।


*dīpaśikhā*/v7/2024/Brahmachari Shubhadip/pp. 40-42

विषयः एव रोचते, धर्मकथा न रोचते।

७. यः मूलकं भुक्तवान्, तस्य उद्गीरणवायुना एव अनुभूयते, तथा यः धार्मिकः तेन सह सम्भाषणं क्रियते चेत्, स केवलं धर्मप्रसङ्गमेव करोति; एवं यः विषयी स विषयकथाम् एव कथयति।

८. मक्षिकाः द्विविधाः— एका मधुमक्षिका, ताः मधुभिन्नं किमपि न भुञ्जन्ति। अपरा मक्षिका मधुनः अपि उपविशति, यदि च जर्जरं व्रणं लभते तर्हि मधु त्यक्त्वा जर्जरव्रणे उपविशति। तद्वत् द्वौ प्रकारकौ जनौ विद्येते— ये ईश्वरानुरागिणः, ते ईश्वरं विना अन्यविषये वक्तुं न शक्नुवन्ति; ये च संसारे आसक्ताः, ते ईश्वरस्य प्रसङ्गं शृण्वन्तः, यदि कश्चित् काम-काञ्चनादिविषये कथयति तर्हि ईश्वरस्य प्रसङ्गं त्यक्त्वा तेन मत्ताः भवन्ति।

९. बद्धजीवः हरिनाम स्वयं न शृणोति, परेषामपि श्रवणं बाधते, धर्मस्य अपि च धार्मिकाणां निन्दां कुर्वन् वर्तते, कश्चित् ध्यानं करोति चेत्, तं बहुधा प्रकारेण उपहसति।

१०. यथा मकरस्य गात्रे शस्त्रेण प्रहारं करोति चेत् शस्त्रं प्रतिनिवर्तते, तत् कथमपि तस्य गात्रं न स्पृशति, तथैव भवन्तः निमीलितजीवस्य समीपे धर्मकथां भूयः प्रचारयन्ति चेदपि तेषाम् आत्मानं सा कथमपि न स्पृशति।

११. सूर्यस्य किरणः सर्वत्र समानरूपेण पतति चेदपि जले, दर्पणे, सर्वेषु स्वच्छवस्तुषु च अधिकं प्रकाशते। ईश्वरस्य विकासः सर्वेषु हृदयेषु समानः भवति चेदपि साधुनां हृदयेषु अधिकं प्रकटितः भवति।

१२. सर्वेषाम् अपूपानाम् त्वचः समानाः भवन्ति चेदपि अन्तःस्थे पूरणे भेदाः सन्ति - केषुचित् नारिकेलपूरणं, अन्येषु क्षीरपूरणम् इत्यादयः। तथैव मनुष्याः सर्वे समानरूपाश्चेदपि गुणभेदेन स्वतन्त्राः भवन्ति।

१३. यद्यपि जलं सर्वं नारायणम्, किन्तु न हि सर्वं पेयम्। ईश्वरः सर्वत्र अस्ति, परन्तु सर्वत्र गन्तुं न शक्यते। यथा कस्मिंश्चिद् जले पादं प्रक्षालयितुं शक्यते, कस्मिंश्चिद् जले मुखं प्रक्षालयितुं शक्यते, किञ्चिद् जलं पातुं वा शक्यते, पुनः किञ्चिद् जलं स्प्रष्टुमपि न शक्यते, तथैव केषुचित् स्थानेषु गन्तुं शक्यते, अपि च केभ्यश्चित् स्थानेभ्यः दूरात् प्रणम्य पलायितव्यम्।

१४. व्याघ्रस्य अन्तः ईश्वरः अस्ति इति सत्यं, परन्तु व्याघ्रस्य सम्मुखं न गन्तव्यम्। दुर्जने अपि ईश्वरः अस्ति इति तु सत्यं, किन्तु दुर्जनस्य सङ्गः न कर्तव्यः।

१५. गुरुः शिष्यम् उपदिश्य "सर्वः पदार्थः एव नारायणः" इति अवोचत्, शिष्यः अपि तथैव अवागच्छत्। एकदा गजः मार्गे आगच्छति स्म, उपरिष्टाद् हस्तिपकः "अपसर" इति अवदत्। शिष्यः चिन्तितवान्, "किमर्थं अहम् अपसरामि? अहम् अपि नारायणः, गजः अपि नारायणः, नारायणस्य समीपे नारायणस्य भयं किमर्थम्?" इति सः न अपसृतवान्। अन्ते गजः तं शुण्डेन उद्धृत्य दूरं क्षिप्तवान्, येन तस्य महती पीडा अभवत्। अनन्तरं सः गुरोः समीपं सर्वं वृत्तान्तं ज्ञापितवान्, तेन गुरुः अवदत् – "साधु उक्तवान् - त्वं नारायणः असि, गजः अपि नारायणः, परन्तु उपरिष्टात् हस्तिपकरूपः नारायणः भवन्तं सावधानं भवतु इति अवदत्,

भवान् हस्तिपकनारायणस्य वार्तां किमर्थं न श्रुतवान्?”

१६. सतः क्रोधं कीदृशं जानासि? यथा जलस्य चिह्नम्। जलेन एकं चिह्नं दीयते चेत् तदैव अन्तर्धानं भवति, तथैव सतः क्रोधः भवति चेदपि तदैव अपगच्छति।

१७. ब्राह्मणगृहे जन्ममात्रेण सर्वे ब्राह्मणाः भवन्ति इति तु सत्यं, किन्तु केचन अतीव पण्डिताः भवन्ति, केचन देवतापूजां कुर्वन्ति, केचन तण्डुलान् पचन्ति, केचन च वेश्याद्वारं गच्छन्ति।

१८. यथा निकषे चिह्नप्रदानमात्रेण सुवर्णं वा पित्तलं वा ज्ञातुं शक्यते, तथैव भगवतः समक्षं सारल्यस्य वा कापट्यस्य वा परीक्षा सम्भवति।

१९. बद्धस्य संसारिणः जनस्य कथमपि चैतन्यं न भवति। जगति दुःखक्लेशं सङ्कटं च प्राप्यापि तेषां चैतन्यं न भवति। यथा उष्ट्रेभ्यः कण्टकतृणभोजनं रोचते, खादन् मुखात् शोणितं धाराप्रवाहवत् प्रवहति, तथापि स कण्टकयुक्तस्य तृणस्य भोजनं न त्यक्ष्यति; तथैव संसारिणः जनाः बहु शोकं दुःखं च प्राप्नुवन्ति, कतिपयेभ्यः दिनेभ्यः परं पुनः यथा आसन् तथैव भवन्ति।